Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्त्वावतारः

कर्ता.

आठकोटी मोटी पक्षना

मुनि श्री देवचन्द्रजी कच्छी.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्त्वावतारः।

प्रकाशकः—

शेठ मेघजी थोभण

संशोधकः—

न्यायतीर्थ पंडित श्री. बेचरदास जीवराज.

लेखकः

मुनि देवचन्द्रः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लेखक—

मुनि देवचन्द्र:

भावनगर:—

धी आनंद प्रि. प्रेसमां

शाह गुलाबचंद लल्लुभाइए

छाप्युं.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समर्पणम्.

मुनिपुङ्गव न्यायरत्न श्री रत्नचन्द्रस्वामिनः !
सन्ति च श्वेताम्बर "स्थानकवासी" ति संप्रदाये अद्वितीयनैयायिकाः न्यायनिष्णाताः भवन्तः अतः
श्रीमतां शुभवतां भवतां सुनामधेयेन
साकं संयोज्येदं न्यायपुस्तकं
"तत्त्वावतार" नामकम् च
समर्पयितुमुत्सुको-
ऽहम् मुनिश्री
देवचंद्रः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वीर !

શ્રીયુત શેઠ મેઘજીભાઈ થોભણ જે. પી. તરફથી કચ્છ માંડવી-માં **"જૈન સંસ્કૃત પાઠશાળા"** સંવત્ ૧૯૬૩ ના ફાગણ વદિ ૯ ને દિવસે ઓપન કરાયેલ છે. શાળાને નિભાવવા સ્થાયી ફંડ રૂ. ૨૬૦૦૦ છવીશ હજાર છે. તેના વ્યાજમાંથી શાળા ચલાવવામાં આવે છે. આ શાળામાં સ્થાનકવાસી કે દેરાવાસીનો ભેદ નથી. બન્ને ફિરકાવાલા સાધુઓ અને ગૃહસ્થો લાભ લઇ શકે છે.

આ શાળામાં સંસ્કૃત, વ્યાકરણ, કાવ્ય, કોષ, અલંકાર અને ન્યાયશાસ્ત્રનો અભ્યાસ કરાવવામાં આવતો, સાધુઓ સારી રીતે લાભ લેતા, શાળાને અંગે શેઠ તરફથી એક ન્હાનું પુસ્તકાલય છે. જેમાં સંસ્કૃતના અભ્યાસીયોને અભ્યાસ અને વાંચન માટે પુસ્તકો પૂરાં પાડવામાં આવેલ છે.

"**તત્ત્વાવતાર**"ના લેખક નૈયાયિક પંડિત મુનિ શ્રી દેવચંદ્રજી મહારાજે પણ આ શાળામાંજ વિશેષ અભ્યાસ કરેલ છે.

આ શાળામાં પ્રથમ કાલાવડના પંડિત લક્ષ્મીશંકર શાસ્ત્રીને રોકેલા. ત્યાર પછી કચ્છ ભુજનાં શાસ્ત્રી પોપટભાઇને રોકેલા હતા. ત્યાર બાદ કાશીના નૈયાયિક પંડિત રાજારામ દીક્ષિતને મોટા પગારથી રોકવામાં આવેલ હતા. તેઓ સ્વર્ગસ્થ થવાથી હાલમાં ભુજના ન્હાનાલાલને રોકવામાં આવેલ છે. જેઓ ઇંગ્લીશ વિદ્યાર્થિઓને અભ્યાસ કરાવે છે. હાલમાં સાધુઓ અભ્યાસ કરનાર કોઇ નથી. શેઠશ્રીનો ધર્મપ્રેમ સાથે જ્ઞાનપ્રેમ અધિક હોઇને આ શાળા ખંતથી ચલાવે છે.

શેઠ મેઘજીભાઇએ પોતાની જીંદગીમાં અત્યાર સુધી રૂ. અઢીલાખને આશરે સદ્વ્યય કરેલ છે. તેમણે પોતાની જીંદગીને સફલ કરી છે માટે મારા તેમને ધન્યવાદ છે. લેખક,

લાલજી લધુભાઈ શાહ-જામનગરવાલા.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मरणांजलिः

(पद्य–गद्यात्मिका.)

दीप्तित्वाद्राजते यश्च, ज्ञमेः राजेति संज्ञया;
चिच्छक्तौ रमते रामः राजारामेति योजनात्. १

पारिणं न्यायतंत्रस्य, दीक्षितोपाधिधारिणं;
स्मारं स्मारं प्रयच्छामि,—तं स्मरणांजलिं मुदा. २

अयि ! मच्चित्ताराम,—पोषक ! त्वया साहित्यरसात्सा;
विकसितात्मकलिकाऽभू, या शुष्का तनुवाटिकायाम्. ३

अर्पितं नवजीवनं, चिच्छक्तिकं न्यायदर्शनबोधात् ;
भवता हृद्कोरके मे, सद्प्रेमपयस्सिंचनत्वाच्च.... ४

त्वदीयात्मन उदारं, चिन्मयं प्रकाशमवाप्य नूतनं;
प्रोल्लसितं प्रेम पुष्पं, प्रमेयादि सुरभिसंमिश्रं.... ५

विस्मरामि प्रसादं, किं श्रीमतोऽनवद्यविद्यागुरो !;
स्फारोपकारभारं, कथं प्रत्युपकरोमि सादरं. ६

प्रत्युपकर्तुमात्मानं, विनश्वरं प्राज्यराज साम्राज्यं
बुध्ध्वा द्रव्य प्रभृतिं, समर्पयामि च तव सर्वस्वं.... ७

प्याट्प्रियविद्यारसिक ! सुद्दमैक्षिकप्रखर—
न्यायशिक्षादीक्षाविचक्षणश्रीराजारामदीक्षित !
श्रीमद्भिः स्वप्रयाणं कृतं तत्कथमेतन्मर्त्यलोके,
विवत्सा न कृता ? श्रीमतां परमात्मनिचितं संभ्रमं ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

શેઠ મેઘજીભાઈ થોભણ જે. પી.

કચ્છ-માંડવીવાલા.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

વેદમૂર્તિ ન્યાયરત્ન



પંડિત રાજારામ દીક્ષિતજી

મુ૦ બનારસ (કાશી)

આનંદ પ્રી. પ્રેસ–ભાવનગર.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किमस्माकं प्रेमशैथिल्यं दृष्टं ?, किं च कुरंगवारि वद–
ऽसारं प्रतिभातं ? अस्तु !
अयि ! अमृतमयि ! कथं रोचेत भवद्भ्यो विषमय–
मर्त्यसुखव्रातः ? तर्हि सानंदं विलसंतुतराम् ।
शुभवंतः भवंतः विश्वेश्वर चरणारविंदे.
तत्रैव विश्राम्य कल्याणभाजः बोभवंतु,
अंग ! विकसित प्रौढ पुष्प सदृश वेदमूर्त्ते !
संहिताद्यष्ट वेदविकृतिविज्ञान सुकृतिन् !
प्रार्थयिष्येऽहमत्रतः युष्माकं श्रेयःश्रिये
परमशंकर विश्वनाथस्य सविधे,
श्रीमतामात्मानं सर्वदा–सर्वत्र च शांतिर्भवतु.

उपसंहार.

दानामृतं यस्य करारविंदे, ज्ञानामृतं यस्य मुखारविंदे;
कृपामृतं यस्य मनोऽरविंदे, सः वल्लभः कस्य नरस्य न स्यात् . १

संवत १९८१
कार्तिक शुक्ला
प्रतिपदा.

लेखकः—
मुनि देवचंद्रः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रंथकार परिचयः

सुधर्म्मगणिनां पारं,–पर्यें दिगंबरादिभिः;
मतैर्गच्छैश्च खंडिते,–ऽप्यखंडे मन्वते स्वकं. १
श्वेतांबरदशापक्षे, [1]धर्म्म–वृंदे युगाधीशाः;
देवजित्स्वामिनस्तेषां, शिष्यस्तिलकसिंहश्च. २
कर्मचंद्रस्तु तच्छिष्यः, धीरः श्रीमान् प्रभावकः;
नवरयासरोरुहे, लीनावलीव सोदरौ. ३
विशुद्धचित्तसंबद्धौ, सिद्धांतपारगामिनौ;
विजयपाल--ज्ञानेंदू, स्याद्वादिनौ च स्वामिनौ. ४
ज्ञातॄणां विश्वतत्त्वस्य, असद्ग्रहस्य भेत्तॄणाम्;
विजेतॄणां कषा यस्य, श्रीमद् संघस्य नेतॄणां. ५
विजयपाल स्वामिनां, तच्छिष्यः रत्नचंद्र वै;
व्याख्यातापरभूत्कंठी, आसीच्च कांतिमान् सुधीः. ६
तच्छिष्यः कर्णजित् स्वामी, गुरुणानुपकारकः;
तत्पादपंकजे लीनः, विनेयो देवचंद्रोऽहं. ७
निर्मितोऽयं मया ग्रन्थः, ग्रथितः स्वरव्यंजनैः;
पूर्वर्षिन्यायसूत्रेण, पुष्पमालेव सूत्रितः. ८
ख्याते पौराणिकेऽनूपे, कच्छदेशेति सांप्रतं;
यदुवंशे समुद्भूतः, श्रीखेंगारश्च भूपतिः. ९
तस्य विजयिनि राज्ये, सिंधुतीरे विराजिते;
समृद्धे धन धान्यैश्च, श्रीमंडन पुरे शुभे. १०
निधिरसतत्त्वविधुमिते, दीपोत्सवी शोभनवासरेऽब्दे;
'विद्यागुरुसहायेन, कृतेयं कृतिः सदा जीयात्. ११

---

१ धर्मदासजीना समुदायमां.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

तत्त्वावतारः ।

इह हि “ इहं एगेसिं नो सन्ना भवइ, तं जहाः—पुरत्थिमाओ वा दिसाओ आगओ अहं अंसि ? दाहिणाओ वा दिसाओ आगओ अहं अंसि ? पच्चत्थिमाओ वा दिसाओ आगओ अहं अंसि ? उत्तराओ वा दिसाओ आगओ अहं अंसि ? उड्ढाओ वा दिसाओ आगओ अहं अंसि ? अहे-दिसाओ वा आगओ अहं अंसि ? × × × अत्थि मे आया उववाइए, नत्थि मे आया उववाइए, के अहं आसी ? के वा इओ चुओ इह पेच्च भविस्सामि ? ” इत्यादि–परमर्षिप्रवचनानुसारेण लौकिकव्यवहारसंप्रगाढानां कुत एतद् उद्गतं भवेत्—कोऽहम् ? कुत आयातः ? क्व यास्यामि ? किं करोमि च ? इति । एतादृशीं संज्ञां विना तवममायिते अस्मिन् लोके न हि कश्चित् कुतश्चित् कदाचित् किंचिदपि व्यवहारसुखमपि लभेत.

लोको हि सुखैषी—सुखार्थं चैव अहमहमिकया बाढं प्रवृत्तोऽपि प्रत्यक्षयति सबलं दुर्बलं भक्षयन्तम्, अनुभवति सर्वत्र जीवो जीवस्य जीवनम्, सम्प्रेक्षते च सर्वं सम्बन्धम्–आ स्वार्थम्, नीतिं नीत्याभासेन परिणमन्तीम्, धर्मम्—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधर्मप्रायकलेवरम्—संगृहीतसंख्यातीताऽनर्थकमतार्थभरं च. एवं च सुखलवाच्छादिते दुःखभरभृते लोके तां परमर्षिनिर्दिष्टां संज्ञां समाश्रित्यैव स्यात् सर्वः कोऽपि सुखभाक्—अतस्तामेव संज्ञां स्पष्टयितुं प्रवृत्तोऽयं ग्रन्थकार एनं लघुग्रन्थं प्रमाणकाण्ड–नयकाण्ड--जीवकाण्ड--प्रकीर्णककाण्ड--समन्वयकाण्ड–इति काण्डपञ्चकेन विभज्य संदृभति–आदौ तावत् तत्संज्ञासंज्ञापकं महावीरं ज्ञातपुत्रापरनामानं श्रीवर्धमानं संस्मरति.

ध्यायं ध्यायं महावीरं स्मारं स्मारं गुरोर्गिरम् ।
तत्त्वावताररूपोऽयं क्रियते तत्त्वसंग्रहः ॥ १ ॥

प्रतीतार्थमेतत्.

आदौ तावत् प्रमाणकाण्डं प्रथयति—

प्रवृत्ति–निवृत्ति–उपेक्षानिश्रायिनी बुद्धिः प्रमाणम् ।१॥

बुद्धिर्हि आत्मना सहभाविनी, सा च बुद्ध्यावरणतार-तम्येन त्रिधा भवन्ती प्रमाण–अप्रमाण–तदुभयाभावरूपां संज्ञां लभते. तत्र लोके लोकोत्तरे च व्यवहारे प्रमाणरूपैव बुद्धिः बुद्धिः, नान्या.

बुद्धिः, बोधः, ज्ञानम्, अनुमानम्, स्मरणम्, प्रत्यभि-ज्ञानम्, चिन्तनम्, विचारणम्, अनुभवनम्, स्पर्शनम्, आस्वा-दनम्, सुघ्राणम्, प्रेक्षणम्, श्रवणं च—इति नार्थान्तरम्.

यथा हि कश्चित् पिपासुर्जलगवेषणाय चङ्क्रममाणो यया बुद्ध्या रूपेण, स्पर्शेन, स्वादेन, जलं निश्चिन्वन् जलादानाय प्रवर्तते–सा जलादानप्रवृत्तिनिश्रायिनी बुद्धिः प्रमाणम्. एवं निवृत्तिनिश्रायिनी, उपेक्षानिश्रायिनी च बुद्धिरपि वाच्या.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा च—एकाऽपि तदावरणतारतम्येन अनेकधा भवति इति तां विभागत आह—

सा द्विधा ॥ २ ॥

निमित्तभेदेन सा बुद्धिर्द्विधा भवति.

द्वित्वमेव नामग्राहं निर्दिशति—

सापेक्षा निरपेक्षा च ॥ ३ ॥

इन्द्रियाणि मनश्च प्रतीतानि. वक्ष्यते चात्रैव तत्स्वरूपादिकम्, या बुद्धिः इन्द्रियाणि मनश्च अपेक्षते सा इन्द्रियमनःसापेक्षा. यथा अस्मादृशाम् अर्वाग्दृशां घटादिबुद्धिः. या च तानि अनपेक्ष्यैव संप्रवृत्ता सा तन्निरपेक्षा. यथा दिव्यदृशां वर्धमानादियोगिनां बुद्धिः. इन्द्रियाणाम्, मनसश्च विषयाः—ग्राह्यपदार्थाः प्रतीता एव.

तद्विषये विशेषस्त्वयम् [परमर्षिप्रवचनालापकैर्-इन्द्रियादीनां विषये विशेषतां पूर्वप्रतिज्ञातां निर्दिशति-] इन्द्रियाणां बाह्यः, आभ्यन्तरश्च आकारः—एतानि च पञ्च अपि इन्द्रियाणि द्विधा, तद्यथा—द्रव्यतः, भावतश्च. तत्र द्रव्यतो निर्वृत्ति-उपकरणरूपाणि, भावतो लब्धि-उपयोगात्मकानि. तत्र आत्मनि तिरोहितो यो उपयोगः—जागरणम्—सा लब्धिः अर्थात् शाकानयनप्रस्थिते वैयाकरणे यथा व्याकरणविषयो बोधः तिरोहितः, तथा ज्ञानावरणपरमाणुक्षयोपशमवशेन कियती चित्शक्तिः तिरोहिता सा—अक्षवाटाऽऽस्थितमल्लसामर्थ्यवत् लब्धिरूपा—विषयग्रहणे च उपादानकारणरूपत्वेन इन्द्रियशब्देन ज्ञापिता—लब्धिरूपम् इन्द्रियम्. या तु चित्शक्तिः आविर्भूता वर्तमाने अर्थक्रियाकारिणी सा उपयोगरूपत्वेन, विषयग्रहणासाधारणकारणत्वेन च उपयोगेन्द्रियम्—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपयोगरूपम् इन्द्रियम्–एते द्वे अपि भावेन्द्रिये नात्मनः पृथग्भूते, केवलं विस्तररुचिप्रमाणशास्त्राभ्यासपरायणशिष्यानुग्रहणार्थमेव पृथग् विविक्ते–इति भावेन्द्रियम्.

द्रव्येन्द्रिययोस्तु निर्वृत्तिर्नाम प्रतिविशिष्टः संस्थानविशेषः सा (निर्वृत्तिर्) अपि द्विधा–बाह्या, आभ्यन्तरा च. तत्र बाह्या पर्पटिकादिरूपा, सा च विचित्रा (अत एव) न प्रतिनियतरूपतया उपदेष्टुं शक्यते. तथाहि–मनुष्यस्य श्रोत्रे नेत्रयोरुभयपार्श्वतो भाविनी, भ्रुवौ च उपरितनश्रवणबन्धापेक्षया समे. वाजिनो नेत्रयोरुपरि तीक्ष्णे–चाग्रभागे (श्रोत्रे) इत्यादि. जातिभेदाद् नानाविधा (बाह्या निर्वृत्तिः–आकृतिः) आभ्यन्तरा तु निर्वृत्तिः सर्वेषामपि जन्तूनां समाना. (तामेव दर्शयति–) " सोतिंदिए णं भंते ! किंसंठिए पण्णत्ते ? गोयमा ! कलंबुयासंठाणसंठिते पण्णत्ते. चक्खिदिए णं भंते ! किं संठिए प० ? मसूरचंदसंठाणसंठिए प० घाणिंदिए णं भंते ! (किंसंठिए) ? गोयमा ! अइमुत्तगचंदसंठाणसंठिते. जिब्भिदिए णं पुच्छा-(किंसंठिए) ? गोयमा ! खुरप्पसंठाणसंठिते. फासिंदिए णं भंते ! किंसंठिते ? गोयमा ! नाणासंठाणसंठिते " " केवलं स्पर्शेन्द्रियस्य निर्वृत्तेर् बाह्याभ्यन्तरभेदो न प्रतिपत्तव्यः—पूर्वसूरिभिर्निषेधात् "

अस्यां च आभ्यन्तरायाम्–इन्द्रियाकृतौ येषु इन्द्रियपरमाणुषु या विषयग्रहणसाधनता–सा एव उपकरणम्–उपकारकत्वेन–तच्च (उपकरणम्) खड्गस्थानीयाया बाह्यनिर्वृत्तेर्या खड्गधारासमाना स्वच्छतरपुद्गलसमूहात्मिका आभ्यन्तरा निर्वृत्तिः–तस्या शक्तिविशेषः–इति उपकरणम् .

इन्द्रियाणां बाहल्यम्—(अत्र सर्वम्–इन्द्रियबाहल्यादिकं आभ्यन्तराकृतेरेव अवसेयम्)—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सो इंदिए णं भंते ! केवइयं बाहल्लेणं पएणत्ते ? गोयमा ! अंगुलस्स असंखेज्जभागे बाहल्लेणं पएणत्ते ? एवं जाव -फासिंदिए (पञ्चानामपि इन्द्रियाणां समानं बाहल्यं -स्थौल्यम्.)

(अत्र आक्षेप-परिहारौ)

" यदि अंगुलस्य असंख्येयभागो बाहल्यं स्पर्शनेन्द्रियस्य ततः कथं खड्ग-क्षुरिकादि-अभिघाते अन्तः शरीरस्य वेदनानुभवः ? (इत्याक्षेपः). त्वगिन्द्रियस्य विषयः शीतादयः स्पर्शाः-यथा चक्षुषो रूपम्, गन्धो घ्राणस्य. न च खड्ग-क्षुरिकादि-अभिघाते अन्तः शरीरस्य शीतादिस्पर्शवेदनमस्ति. किन्तु केवलम् दुःखवेदनम्. तच्च दुःखवेदनमात्मा सकलेनापि शरीरेण अनुभवति-न केवलं त्वगिन्द्रियेण ज्वरादिवेदनवत्-ततो न कश्चिद्दोषः" (इति परिहारः). (पुनरपि)-" अथ शीतलपानकादिपाने अन्तः शीतस्पर्शवेदनाऽपि अनुभूयते, ततः कथं सा घटामटाट्यते ? (इत्याक्षेपः) इह त्वगिन्द्रियं सर्वत्रापि प्रदेशपर्यन्तवर्त्ति विद्यते तथा चाह मूलटीकाकारः—सर्वप्रदेशपर्यन्तवर्त्तित्वात् त्वचोऽभ्यन्तरेऽपि शुषिरस्य उपरि त्वगिन्द्रियस्य भावाद् उपपद्यते अन्तः शीतस्पर्शवेदनानुभवः"

इन्द्रियाणां पृथुता—

सोतिंदिए णं भंते ! केवइयं पोहत्तेणं ? गोयमा ! अंगुलस्स असंखेज्जभागे पोहत्तेणं, एवं चक्खिदिए वि, घाणिंदिए वि, जिब्भिदिए णं पुच्छा ? गोयमा ! अंगुलपुहुत्तेणं पएणत्ते. फासिंदिए णं पुच्छा ? गोयमा ! सरीरप्पमाणमेत्ते पोहत्तेणं पन्नत्ते. "

इन्द्रियाणां कियत्परमाणुमयत्वम्—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोतिंदिए णं भंते ! कतिपदेसिते ? गोयमा ! अणंत-पदेसिते—एवं जाव फासिंदिए–(सर्वेषामपि इन्द्रियाणां–अनन्तप्रदेश (परमाणुमयत्वम् ").

इन्द्रियाणि शरीरान्तरेव स्वस्थित्या कियन्तं गगनाभोगम् –आव्रियन्ते ? तदाह—

" सोइंदिए णं भंते ! कतिपदेसोगाढे ? गोयमा ! असंखेज्जपएसोगाढे पन्नत्ते. एवं जाव फासिंदिए–(पञ्चाऽपि इन्द्रियाणि शरीरान्तरेव असंख्येयान् गगनप्रदेशान् स्वस्थित्या समाच्छादयन्ति) " समानेऽपि सर्वेषामिन्द्रियाणां गगनभागा-वगाहित्वे अयं विशेषः–" चक्षुरिन्द्रियं हि असंख्येयानपि सर्व-स्तोकान् गगनभागान् अवगाहते, ततः चक्षुरिन्द्रियात् अधि-कानपि गगनभागान् श्रोत्रेन्द्रियं समावृणोति, ततः श्रोत्रेन्द्रि-यात् अधिकतरानपि गगनप्रदेशान् घ्राणेन्द्रियं समाच्छादयति, ततः घ्राणात् अधिकतमानपि आकाशप्रदेशान् जिह्वा–इन्द्रियं समवगाहते, ततोऽपि समधिकतरान् गगनभागान् स्पर्शेन्द्रियं समावृतान् करोति " अर्थात्–सर्वेभ्यो महत्तमम् इन्द्रियं स्पर्शे-न्द्रियम्, ततो न्यूनं (लघु–सूक्ष्मम्) जिह्वा–इन्द्रियम्, ततो न्यूनं घ्राणम्, ततोऽपि न्यूनं श्रोत्रम्, ततोऽपि न्यूनम् नेत्रम्–नेत्रं तु सर्वत एव न्यूनतमम्.

इन्द्रियगतपरमाणूनां स्पर्शविचारः—

" चक्षुरिन्द्रिये सर्वस्तोका कर्कशता, गुरुता च, ततः समधिका श्रोत्रे, ततोऽपि समधिकतरा घ्राणे, ततः समधिकतमा रसनायाम्, सर्वेभ्यः समधिका स्पर्श–इन्द्रिये. " स्पर्शेन्द्रिये सर्वस्तोके मृदुत्व–लघुत्वे, ततः समधिके ते रसनायाम्, ततोऽपि ते अधिके घ्राणे, ततः समधिके श्रोत्रे, ततोऽपि अधिकतरे नेत्रे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्थात्-नेत्रं सर्वतोऽपि मृदु, लघु च, स्पर्शेन्द्रियं तु सर्वतः कर्कशम्, गुरु च. ”

इन्द्रियाणां विषयग्रहणपद्धतिः—

“ पुट्ठाइं भंते ! सद्दाइं सुणेति ? अपुट्ठाइं सद्दाइं सुणेति ? गोयमा ! पुट्ठाइं सद्दाइं सुणेति, नो अपुट्ठाइं सद्दाइं सुणेति, पुट्ठाइं भंते ! रूवाइं पासति ? अपुट्ठाइं पासति ? गोयमा ! नो पुट्ठाइं रूवाइं पासति, अपुट्ठाइं रूवाइं पासति-(एवं) गंधाइं पुट्ठाइं अग्घाइ, नो अपुट्ठाइं, रसाइं पुट्ठाइं अस्साएइ, नो अपुट्ठाइं, फासाइं पुट्ठाइं पडिसंवेदेइ नो अपुट्ठाइं—पविट्ठाइं सद्दाइं सुणेति नो अपविट्ठाइं सद्दाइं सुणेति—एवं जहा पुट्ठाणि तहा पविट्ठाणि वि ”

इन्द्रियाणां कियतो दूरात् विषयग्रहणम् ?-

“ सोतेंदियस्स णं भंते ! केवतिए विसए पण्णत्ते ? गोयमा ! जहण्णेणं अंगुलस्स असंखेज्जभागेण, उक्कोसेणं बारसहिं जोअणेहिंतो अविच्छिण्णे पोग्गले पुट्ठे पविट्ठाइं सद्दाइं सुणेति, चक्खियस्स णं भंते ! केवतिए विसए पण्णत्ते ? गोयमा ! जहण्णेणं अंगुलस्स असंखेज्जभागेण, उक्कोसेण सातिरेगाओ जोयणसयसहस्साओ अच्छिण्णे पोग्गले अपुट्ठे. अपविट्ठाइं रूवाइं पासइ, घाणिंदियस्स पुच्छा ? गोयमा ! जहण्णेणं अंगुलस्स असंखेज्जभागेण, उक्कोसेणं नवहिं जोयणेहिंतो अच्छिण्णे पोग्गले पुट्ठे पविट्ठाइं गंधाइं अग्घाइ, एवं-जिब्भिंदियस्स वि, फासिंदियस्स वि. ”

अत्र तावद् इन्द्रियाणां विषयग्रहणपद्धतौ मतान्तराणि-

सर्वाणि इन्द्रियाणि प्राप्यकारीणि अर्थात्-इन्द्रिय-विषययोः संस्पर्शद्वारेणैव विषयग्राहीणि इति मतम्—कणभक्ष-अक्षपाद-मीमांसक-सांख्यप्रावचनिकप्रवराणाम्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चक्षुः, श्रोत्रं च इन्द्रियं विना अन्यानि त्रीणि प्राप्यकारीणि, चक्षुः श्रोत्रे तु अप्राप्यकारिणी अर्थात् विषयसंस्पर्शमन्तरैव तद्बोधविधायिनी इति मतम्—तथागततार्किकगुरूणाम्.

जैनतार्किकाणां तु मतम्— पूर्वं " पुट्ठं सुणेइ सद्दं, रूवं पुण पासइ अपुट्ठं तु " इत्यादिना दर्शितमेव. अर्थात् जैनतर्कणानुसारेण—चक्षुः मनश्च अप्राप्यकारि, अन्यानि सर्वाणि प्राप्यकारीणि—इति.

अत्र विपुले मतभेदे कतरद् मतं श्रेयः ? इति प्रश्नप्रतिवचनम्—त एव दातुमलंभविष्णवः—ये शरीरशास्त्रान्तर्गत—इन्द्रियविद्याविशारदा आधुनिका वैज्ञानिकाः, प्राचीना वा शरीर—इन्द्रिय—मानसशास्त्रप्रवणाः पण्डिताः.

इति इन्द्रियाणि निरूपितानि, अधुना तत्प्रवरं मनो निरूपणीयम्, तत्स्वरूपमेवम्—मनो हि द्विविधम्—द्रव्यरूपम्, भावरूपं च. मननरूपम् आत्मस्पन्दरूपं मनो भावरूपम्. परमाणुरूपं यद् मनः तद् द्रव्यरूपम्. तथाहि—मानसा हि परमाणवः समग्रगगने संमृद्य संमृद्य भृता इव तिष्ठन्ति, ते च विचारप्रवृत्तस्य आत्मनः विषय ग्रहणे इन्द्रियाणि इव सहायताकारिणः—विचारको हि विचारं कुर्वन् विचारानुरूपान् मनसः परमाणून् क्षणे क्षणे आदत्ते, निसृजति च. जैनपरिभाषया ते परमाणवः ' मनोवर्गणा ' नाम्ना प्रतीताः—ते च जडत्वेन पुद्गलपरिणामित्वेन च मूर्त्ताः, रूप—रस—गन्ध—स्पर्श—शब्दवन्तः जडपुद्गलसमानधर्मिणश्च. समग्रशरीरेण शीताऽऽतपादेरनुभवस्य आबालगोपालप्रतीतत्वात्. मनो हि शरीरव्यापि सर्वेन्द्रियसहायकं च इति जैनतर्कणा.

मनो हि अणुतमम्, हृदयैकदेशवर्ति च—इति अन्येषां तर्कणा, तथागततर्कणा तु नावगता.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं तर्कणाद्वयमध्ये का प्रमाणीभूता ? इति मानसशास्त्रिणो गम्भीरदृशः, योगिनश्च एव परिप्रष्टव्यास्तथ्यगवेषणपरैः। एवं सापेक्षबुद्ध्या पदे पदे अपेक्ष्यमाणानि इन्द्रियाणि मनश्च संक्षिप्तमत्र निरूपितानि. विस्तरार्थिभिर्विशेषार्थिभिश्च ते ते प्राचीना आम्नायाः, तदभ्यासिनः, तदनुभविनश्च आप्ताः पर्युपास्या इति—सापेक्षा बुद्धिः.

अथ विवरणे एव निरपेक्षां बुद्धिं स्वरूपत आविर्भावयन्नाह—

या तु बुद्धिः इन्द्रिय-मनोनिरपेक्षा—केवलं स्वाधारमात्मानमेव अपेक्षमाणा—अन्यं च कंचिद् अपि न प्रतीक्षमाणा बुद्धिः सा निरपेक्षा.

सा चैकापि तदावरणतारतम्येन त्रिधा. तथाहि—अवधिज्ञानरूपा, मनःपर्यायरूपा, केवलज्ञानरूपा च.

तत्रापि अवधि-मनःपर्यायरूपबुद्धिद्वयं हि तदाधार—आत्मविकासतारतम्येन अनेकधा दर्शितं शास्त्रकारैः ।

रूपवन्ति एव वस्तूनि प्रत्यक्षयन्ती अवधिबुद्धिस्तदाधाराणां अनेकविधवैचित्र्येण अनेकधा विचित्रा.

केवलं मानसान् अणून् प्रत्यक्षमानयन्ती मनःपर्यायबुद्धिरपि तदाधारतरतमतया विविधा.

या तु केवलज्ञानबुद्धिः सा अनश्वरत्वेन सर्वत्र समानकारणत्वेन च सर्वेषु आत्मसु उत्पद्यमाना एकरूपैव—न विविधा न्यूनाधिका वा—तद्विषयश्च सर्वं वस्तु—नास्ति तत् किंचिद् जगत्त्रये यत् स्यात् तदविषयः—सर्वासु बुद्धिषु एषा एकैव निरपेक्षा बुद्धिः केवलम् औदासीन्यसंस्थापिनी—उपेक्षानिश्चा-

२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यिनी, अन्याश्च ता बुद्धयः प्रवृत्तिप्रभृतिकं तत्रयं यथोचिततया आविष्कुर्वन्ति आत्मनि–यदत्र निरपेक्षबुद्धित्रयं प्ररूपितं तदेव शिष्यशासनानुरूपं विस्तारमानीय भगवता पतञ्जलिना महर्षिणा स्वयोगानुशासने 'अतीतानागतज्ञान' 'सर्वभूतरुतज्ञान' 'पूर्वजातिज्ञान' 'परचित्तज्ञान'–'सर्वज्ञातृत्व' प्रभृतिशब्दौघेन निरदेशि विभूतिपादे विभूतिरूपतया–अतस्तद्व्याख्याविशेषविस्तरो ग्राह्यो जिघृक्षुणा तत्तत्शास्त्रान्तरात् इति निरपेक्षा बुद्धिः.

(अत्राक्षेप-परिहारौ)

ननु भोः ! नवीनग्रन्थकार ! किमेवं त्वम् एकरूपमेव प्रमाणं प्रलपसि ? त्वत्तः प्राचीनाः त्वत्संमानितचरणयुगलाश्च जैनाचार्याः, अन्ये च महर्षयः प्रमाणसंख्यां यथा संख्यातवन्तस्तथा त्वं कथं नाऽकार्षीः ?

तथाहि—अनुयोगद्वारसूत्रे एव केनचित् जैनसूरिणा प्रमाणभूरित्वमेवं प्रभाषितम्—

"नाणगुणप्पमाणे चउव्विहे पण्णत्ते, तं जहा—पच्चक्खे, अणुमाणे, ओवम्मे, आगमे. × पच्चक्खे दुविहे पण्णत्ते × इंदिअपच्चक्खे अ, नोइंदियपच्चक्खे अ. × अणुमाणे तिविहे पण्णत्ते ×पुव्ववं, सेसवं, दिट्ठसाहम्मवं, ओवम्मे दुविहे पण्णत्ते × साहम्मोवणीए अ वेहम्मोवणीए अ. (ते द्वे अपि त्रिविधे त्रिविधे प्रज्ञप्ते) आगमे दुविहे पण्णत्ते × लोइए अ, लोउत्तरिए अ. (लोइए) भारहं, रामायणं जाव चत्तारि वेआ संगोवंगा. (लोउत्तरिए) दुवालसंगं गणिपिडगं आयारो जाव दिट्ठिवाओ."

स्याद्वादरत्नाकरे श्रीदेवसूरिपादाः प्रमाणविषये एवमाहुः—

" तत् (प्रमाणम्) द्विभेदम्–प्रत्यक्षं च परोक्षं च. तद् (प्रत्यक्षम्) द्विप्रकारम्–सांव्यवहारिकम् पारमार्थिकं च. तत्राद्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सांव्यव०) द्विविधम्-इन्द्रियनिबन्धनम्, अनिन्द्रियनिबन्धनं च. तद् द्वितयमपि (अवग्रहादिभेदेन) चतुर्विकल्पम्. पारमार्थिकं × सकलं विकलं च × विकलम्-अवधिज्ञान-मनःपर्यायज्ञानरूपतया द्वेधा. × सकलं केवलज्ञानम्. स्मरण-प्रत्यभिज्ञान-तर्क-अनुमान-आगमभेदतः तत् (परोक्षम्) पञ्चप्रकारम्. आगमः × द्वेधा लौकिको लोकोत्तरश्च-"

तथा मतिरष्टाविंशतिधा, श्रुतं चतुर्दशधा, इत्याद्यनेक-प्रकारा प्रमाणप्रमितिः इति जैनी प्रमाणगणना.

" प्रत्यक्ष-अनुमान-उपमान-आगमाः प्रमाणानि " इति न्याय-विशेषविदौ.

" प्रत्यक्ष-अनुमान-आगमाः " इति सांख्य-योगौ.

"प्रत्यक्ष-अनुमान-उपमान-आगम-अर्थापत्ति-अभा-वाः " इति मीमांसक-वेदान्तिनौ.

"प्रत्यक्ष-अनुमान-उपमान-आगम-अर्थापत्ति-अभा-व-संभव-ऐतिह्यानि " इति ज्योतिर्विदः पौराणिकाश्च.

"तान्येव चेष्टा-समधिकानि नव प्रमाणानि " इति तन्त्रतन्त्रिणः-इत्येवं प्रकारेण प्रमाणस्य नानारूपतायामपि निरूपितायां तैस्तैर्विद्वद्वरैः किमेवं त्वं तदेकरूपमेव सूत्रयसि-किं त्वं तेभ्योऽपि दक्षंमन्योऽसि-ब्रूहि भोः ! (इत्याक्षेपः)

महाशय ! शृणु-यथाहि व्यवहारप्रवराः कस्मैचिद् एकस्मिन् रूप्यके दातव्ये रूप्यकमेव ददते, कस्मैचिद् तदर्धद्वयं ददते, कस्मैचिद् तच्चतुष्टयं प्रयच्छन्ति, कस्मैचिद् तदष्टभागान् संप्रयच्छन्ति, कस्मैचिद् तत्षोडशभागान् संप्रयच्छन्ति, कस्मैचिद् तद्द्वात्रिंशद्भागान् विभजन्ते, कस्मैचिद् तच्चतुष्षष्टिक-भागान् संप्रददते, कस्मैचित्तु तद्विनवत्यधिकशतभागानपि सं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रयच्छन्ति—परन्तु न तत्र कस्यचिद् दायकस्य ग्राहकस्य च कदाचिदपि जायमानो विवादलेशोऽपि दृष्टः, श्रुतो वा—केवलं यथा व्यवहारानुकूल्यं तथा तेषां दायक—ग्राहकाणां प्रवृत्तिः, सा च यथा प्रशस्यतमा तथैव जिज्ञासुजनानुकूलतया एकधा, द्विधा, त्रिधा, चतुर्धा, षोढा, अष्टधा, नवधा—ततोऽपि अनेकधा प्रमाणनिरूपणविधानं न दूषणावहम्, किन्तु विस्तररुचिजिज्ञासुचित्तानुकूल्येन संक्षिप्तरुचिशिष्यचित्तानुरञ्जनतया च तत्सर्वमपि निरूपणं भूमिकापेक्षया सर्वेषामेव अधिकारानुरूपं उपयोगि एव. नातः केनापि प्रामाणिकेन तद्भेदोपभेदखण्डनमण्डनाय प्रयासो विधेयः, नाऽपि लाघव—गौरवे च संदर्श्य शब्दाशब्दि दूषणादूषणि च योद्धव्यम्—यैश्च सम्प्रदायविमूढैः प्राचीनार्वाचीनैः जैन—जैनेतरैः तद् युद्धं विधाय अद्यावधि थूत्कृतम्—तत् तेषां थूत्कृतमेव—जिनाज्ञादूषकम्. (इति परिहारः) किमधिकेन ?

एतदेव स्मर्यते महावादिवचः—

" प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ।
प्रमाणलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् "

इति प्रमाणनिरूपणे प्रथमं प्रमाणकाण्डम्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निरूपिते प्रमाणे अधुना नयाः प्रस्तूयन्ते—

प्रमाणं हि निश्चायकम्, नयास्तु नायकाः-प्रेरकाः-प्रापकाः-प्रवर्तका इति तयोर्द्वयोरपि समाने चित्ताभिप्रायरूपत्वेऽपि क्रियाविशेषात् वैशिष्ट्यम्-इति प्रमाणात् नयं विभज्य नयं व्युत्पादयति

नयति प्रमाणसंगृहीतं बोधं व्यवहारम्-इति नयः ॥१॥

नयति-प्रेरयति, प्रापयति, प्रवर्तयति च-इति नार्थान्तरम्. नयति हि द्विकर्मा-अत्र च 'बोधम्' इति गौणं कर्म, 'व्यवहारम्' इति च मुख्यम्. तस्यैव (व्यवहारस्य) नयतेः मुख्यसंसर्गात्. पूर्वोक्तेन प्रमाणेन संग्रहीतो बोधः नहि एकेनैव समयेन युगपद् व्यवहारपथं प्रापयितुं शक्यः, किन्तु यथाकालं अर्थक्रियाकरव्यवहारानुकूलतया तदंशा एव (बोधांशा एव) व्यवहारमार्गं नेतुं शक्याः-यश्च तदंशानाम् नायकः-नयनविधायी स एव वक्तुरभिप्रायविशेषो नयः।

उदाहरणेन च नयं स्पष्टयति-यथाहि एक एव मनुष्यः प्रमाणपुरस्सरं कस्यचित् पितृत्वेन, कस्यचित् पितृव्यत्वेन, कस्यचित् पितामहत्वेन, कस्यचित् मातुलत्वेन, कस्यचित् पितृष्वसृस्वामित्वेन, कस्यचित् मातृष्वसृपतित्वेन, कस्यचित् श्वसुरत्वेन, कस्यचित् जामातृत्वेन, कस्यचित् भागिनेयत्वेन केनचित् एकेन प्रमात्रा ज्ञातः, स च प्रमाता यद्यपि तत्पुरुषविषये तान् सर्वानपि संबंधान् प्रवृत्ति-निवृत्तिनिश्चायिना प्रमाणेन अवबुद्धवान्-किंतु न हि तान् एकस्मिन् एव समये स्थले वा स प्रमाता उपयोक्तुमलं भवेत्-यदा च तस्य पुरुषस्य चैत्र-पितृत्वेन प्रमातुः प्रयोजनम् तदा प्रमाता प्रमाणसंग्रहीतसर्वसम्बन्धबोधान् हृदयगतानपि गौणान् कृत्वा पितृनयेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पितृसम्बन्धमाविष्कृत्य प्रकटीकरोति 'अयमस्ति चैत्रपिता' इति। एतत्प्रकटीकरणसमये न हि प्रमाता तान् पितृव्यतिरिक्तान् संबन्धान् विस्मरति निषेधति च. किन्तु हृदयगतप्रमाणसंगृहीतबोधेषु यो बोधो यदा, यत्र, यथा वा अर्थक्रियाकारी तं तदा, तत्र, तथा प्रयुज्य, अन्यांश्च गौणीकृत्य प्रवर्तमानस्तेन व्यवहारसाधकनयेन प्रमेयं समादत्ते, प्रमेयात् निवर्तते, उदास्ते च–नयो हि रीति–अपरनामा व्यवहारसाधकः–व्यवहारमार्गानुसारी चित्ताभिप्रायविशेषः-एवमेव तस्यैव पुरुषस्य यदा मोहनदासमातुलत्वेन प्राप्ते प्रयोजने तेन मातुलनयेन अन्यान् सम्बन्धानुपसृज्य प्रमाता आविष्करोति 'अयमस्ति स एव मोहनदासमातुलः'–एवं चैव–चित्तरञ्जनश्वसुरत्वेन आगते प्रयोजने प्रमाता तमेव पुरुषं प्रख्यापयति 'अयमस्ति स एव चित्तरञ्जनश्वसुरः' अनेनैव प्रकारेण अत्र उदाहरणे अन्यत्र च सर्वत्र लौकिक–लोकोत्तरव्यवहारसंभारे नेतव्या इयमेव नयव्याख्या.

नयमेव संख्याति—

व्यवहाराणामसंख्येयत्वेन नया अपि असंख्याः ॥२॥

सर्वे व्यवहारा हि सापेक्षाः सन्तः परस्परं संघटामटन्ति, ते च तादृशा एव लौकिक-लोकोत्तरकार्यसाधकाः स्युः–ते च निखिला अपि संभूय लौकिकीं संख्यामतिक्रामन्ति. अत एव व्यवहारसाधकनया अपि संख्यारहिता संख्याताः संख्यावद्भिः.

तथा च महावादी स्वतन्त्रविचारचणः श्रीसिद्धसेनभट्टारकः—

"जावइया वयणपहा तावइया चेव हुंति नयवाया।
जावइया नयवाया तावइया चेव परसमया" ॥४७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं संख्यातीतानपि नयान् समुच्चित्य संगृह्णाति ग्रन्थकृत्—

ते च द्विधा ॥ ३ ॥

पदार्थाः हि निखिला समुचिताः सन्तो द्वित्व एव निविशन्ते–पदार्थाः, पदार्थधर्माश्च इति । यद्यपि पदार्थ–पदार्थधर्माणां सत्यपि समभिन्नत्वे लोके क्वचित् प्रधानतया पदार्थस्य व्यवहारः, क्वचिच्च प्रधानतया तदभिन्नतद्धर्मव्यवहारः–एवं द्वयोरपि व्यवहारयोः निजानिजभूमिकया प्रधानत्वविवक्षणेन तत्साधकनयानामपि द्वित्वं समुपकल्पितं तैः तैः शास्त्रविशारदैः–इति नयानां द्वित्वं संसिद्धिसौधसमारूढम्.

नामतो द्वित्वमाह—

द्रव्यार्थिकः धर्मार्थिकश्च ॥ ४ ॥

एको हि वचनव्यवहारः स्वकार्यसाधनायां द्रव्यमेव प्रमुखतया समवलम्बते–तद्धर्मास्तु समुपसृजति. यथा च अयम् आत्मा, एतद् जडम्, पुद्गलं वा ।

अन्यश्च वाग्व्यवहारः स्वकार्यसिद्धौ द्रव्यधर्मानेव मुख्यभावेन भजते. तद्धर्माधारं द्रव्यं तु स्वव्यवहारक्रोडीकरोति–यथा च अयम् आत्मा नित्यानित्यः, एतत् पुद्गलं निर्जीवजलरूपम्, शीतलम्, स्निग्धं वा.

नयानां व्यवहारानुगामित्वेन, तत्साधकत्वेन च संख्यातीतत्वेऽपि अस्मिन्नेव नामयुगले–अन्तर्भावः सुकरः सुज्ञानश्च. द्रव्याणि अर्थयते–व्यवहारसिद्धौ अभिलषति इति द्रव्यार्थिकः सकलद्रव्यविषयकव्यवहारनेता। धर्माश्च द्विधा–केचन द्रव्यसहजाः गुणापरनामख्याताः, केचन द्रव्ये क्रमेणावाऽऽविर्भाविष्णवः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पर्याय-पदप्रसिद्धाः तयोर्द्वयोरपि अत्र नये संग्रहाय धर्मान् अर्थयते व्यवहारसाधनतया इति धर्मार्थिकः-अत्र 'धर्मार्थिक' पदेनैव गुणार्थिक-पर्यायार्थिकपदयोः सुसंग्रहाद् न तद्भेदविधानं लेखविषयं नीतम्-तत्सुस्पष्टीकरणाय च 'धर्म' शब्दस्यैव विशदा विपुला च व्याख्या व्याख्याता.

शब्दोऽपि ॥ ५ ॥

व्यवहाराणां वैचित्र्यात् तेषु केचिद् व्यवहारा यथा पदार्थान् तद्धर्मांश्च समवलम्बते, तथा केचिद् व्यवहारा नार्थविषयाः-न धर्मविषयाः-किन्तु केवलम् अङ्गीकृतार्थशब्दविषया एव. यथा पाको भविष्यति, सारथिर्गतः, नैतद् वर्तते रामराज्यम् -तेषां शब्दविषयाणां व्यवहाराणां नयनार्थमयम् शब्दोऽपि नयः-प्रवृत्तः शब्द-नाम्नैव प्रख्यातः। यद्यपि श्रोता पदार्थ-पदार्थधर्मप्रवणमेव शब्दं शृणोति, वक्ताऽपि च तथाप्रकारमेव वक्ति इति-अस्यापि शब्दनयस्य द्रव्यार्थिक-धर्मार्थिकयोरेव निवेशनं समुचितम्, किंतु व्यवहारे क्वचित् कुत्रचित् कदाचित् शब्दव्यवहारस्यापि प्रधानतासमीक्षणेन अयम् मुख्यनयद्वयान्तर्भूतः शब्दोऽपि नयो ग्रन्थकृता पृथगुल्लेखतां नीतः इति.

एष्वेव त्रिषु नयेषु सप्तानामपि नयानाम् तेषां सप्तशत्या वा समावेशः सुबोधः। तथाहि-नैकगमो नैगमो धर्मिणमवलम्बमानः द्रव्यार्थिके, धर्मम्, धर्मान् वा समाश्रितो धर्मार्थिके निविशते.

वस्तुगतपराऽपरसामान्यं भजमानः पराऽपरनामविशिष्टः संग्रहो धर्मार्थिक एव स्वतनुं संधत्ते.

धर्मान् धर्मिणश्च संधारयन् व्यवहारप्रवणो व्यवहारनयः यथायोगं मुख्यनयान्यतरैकनये स्वात्मानं नयति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋजुसूत्रो हि ऋजु एव सूत्रयन्–वर्तमानतामेव समपेक्षमाणः धर्मार्थिके एव नये स्वात्मानं योजयति.

समानार्थेषु अपि शब्देषु निरुक्तभेदाद् वाग्व्यवहारमाश्रित्य भिन्नमर्थं समभिरोहन् समभिरूढोऽपि नयः न शब्दनयात् स्वात्मानं भिन्नं शब्दाययितुं शक्तः

शब्दानां निजनिजप्रवृत्तिनिमित्तभूतक्रियायुक्तमर्थमाविर्भावयन् एवंभूतोऽपि नयः शब्दनयशरीरे एव अन्तर्भवति, एवं ग्रन्थान्तरे विस्तरेण व्याख्याता एते सप्ताऽपि नया अत्र नयत्रये एव संत्रीकन्ते.

किंच, एवमेव क्रियाप्रधानः क्रियानयः, विधिप्रधानो विधिनयः, निषेधप्रधानो निषेधनयः, ज्ञानप्रवणो ज्ञाननयः, गुणप्रवणो गुणनयः–एवं रीत्या नैके नया स्वनेयापेक्षया अत्र नयत्रये एव प्रविशन्ति–इति.

स्वनेयं नयन्तः, अन्यनेयं समुपेक्षमाणा एते शमभृतः।
श्रीरत्नप्रभसूरयोऽपि चैतदेव समूदुः—

"निःशेषांशजुषां प्रमाणविषयीभूयं समासेदुषां
वस्तूनां नियतांशकल्पनपराः सप्त श्रुतासङ्गिनः।
औदासीन्यपरायणास्तदपरे चांशे भवेयुर्नया·
श्चेदेकान्तकलङ्कपङ्ककलुषास्ते स्युस्तदा दुर्नयाः"॥

"अहो! चित्रं चित्रं तव चरितमेतन्मुनिपते!
स्वकीयानामेषां विविधविषयव्याप्तिवशिनाम्।
विपक्षाऽपेक्षाणां कथयसि नयानां सुनयतां
विपक्षक्षेप्तॄणां पुनरिह विभो! दुष्टनयताम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" नायं वस्तु न चाऽवस्तु वस्त्वंशः कथ्यते बुधैः ।
नाऽसमुद्रः समुद्रो वा समुद्रांशो यथैव हि " ॥

इत्यादि.

इति नयाः

पूर्वं तावत् प्रमाणकाण्डे प्रमाणानि, नयकाण्डे च नया निरूपिताः. यद्यपि व्यवहारसाधकयोस्तयोः प्रमाण–नययोर्न निरूपणप्रयोजनम्–लोकसंसिद्धत्वेन. तथापि यथा तौ प्रमाण–नयौ यावता व्यवहारप्रवणौ तावतैव परमार्थनिमित्तभूतावपि–इति नात्र तन्निरूपणा विफला. तथाहि–" के अहं आसी " इत्यादि-विवेकमन्तरैव अयं चिद्रूपोऽपि सुखमयः प्राणी संसारान्तर् अटाट्यमानोऽटाट्यमानो न परिश्रान्तः, प्रत्युत तत्र अटनायामेव सुखमानी नवनीतार्थं जलमेव मथ्नाति–अयमस्य एतादृशी सभ्रान्ता दशा प्रमाण–नययोः विविक्तं संज्ञानं विनैव संजाता. यदि अयं अद्यत एव मध्यस्थीभूय प्रमाण–नयविवेकपूर्वकमेव प्रवर्तेत तदाऽवश्यं सम्यग्ज्ञानी भवेत्, तथा भूत्वा च स्वं स्वरूपं निरीक्षेत निरीक्ष्य च यथा प्रेक्षका नाटकरङ्गं निभाल्य न स्वयं विस्मरन्ति, नाट्यं च स्वतः पृथग्भूतं प्रेक्षन्ते तथा सोऽपि संसारे प्रवर्तमानो ज्ञातपुत्र–बुद्धदेवादिवत् इहैव जन्मनि, जन्मान्तरे वा निर्वाणं प्राप्नुयादिति परंपरया निर्वाणनिमित्तभूतौ प्रमाण-नयौ अतो नात्र तदुल्लेखोऽलेखः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

। जीवकाण्डम् ।

अथ प्रमाण–नयनिरूपणानन्तरं कः प्रमाता ? किंस्वरूपश्च ? इति निरूपणं प्रसक्तम् तदभिन्नत्वात् तदधीनत्वाच्च प्रमाण–नयानामिति प्रमाण–नयकाण्डानन्तरमेव जीवकाण्डं प्रारिप्सुर्ग्रन्थकारः प्रमातारम्–आत्मानं प्ररूपयति—

चेतनः–अपरिस्पन्दी आत्मा–स एव देहस्थितः प्रमाता ॥ १ ॥

अपरिस्पन्दो हि स्वरूपावस्थानम्. अत एव उक्तम् स्वरूपस्थित आत्मा अपरिस्पन्दी, अपरिस्पन्दित्वस्पष्टनाय ग्रन्थान्तरगतश्लोककदम्बकं साक्षित्वेन उपन्यस्यति. तथाहि—

" प्रजहाति यदा कामान् सर्वान् पार्थ ! मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥
दुःखेषु–अनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥
यः सर्वत्रानभिस्नेहः तत् तत् प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥
विहाय कामान् यः सर्वान् पुमांश्चरति निस्पृहः ।
निर्ममो निरहंकारः सो " (ऽ परिस्पन्दमायति) ॥ ७१ ॥

पुनश्च–अपरिस्पन्दं प्राप्त आत्मा " से न दीहे, न हस्से, न वट्टे, न तंसे, न चउरंसे, न परिमंडले, न किण्हे, न नीले, न लोहिए, न हालिद्दे, न सुकिल्ले, न सुरहिगंधे, न दुरहिगंधे, न तित्ते, न कडुए, न कसाए, न अंबिले, न महुरे, न कक्खडे, न मउए, न गुरुए, न लहुए, न सीए, न उण्हे, न निद्धे, न लुक्खे, न काए, न रुहे, न संगे, न इत्थी, न पुरिसे, न अन्नहा "

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" सव्वे सरा निअट्टंति तक्का जत्थ न विज्जति "

मई तत्थ न गाहिता–ओए उवमा न विज्जति–अरूवी सत्ता–अपयस्स पयं नत्थि. से न सद्दे, न रूवे, न गंधे, न रसे, न फासे त्ति बेमि " इति अपरिस्पन्दी आत्मा, तत्स्वरूपविशेषार्थिना तु श्रीज्ञातनन्दन–शाक्यनन्दनयोश्चर्या यथायथं सूक्ष्मदृष्ट्याऽवलोकनीया इति.

अथ ' स एव देहस्थितः प्रमाता ' इतिसूत्रखण्डं मण्डयन्नाह—

देहस्थित आत्मा परिस्पन्दी, अपरिस्पन्दी चेति द्विधा ॥ २ ॥

तत्र योऽपरिस्पन्दी–स सर्वं समुपेक्षमाणो ज्ञातनन्दनवत् संचरति–तत्स्वरूपं च प्रागवदेव अवसेयम्.

इदानीं तु परिस्पन्दिनं तं दर्शयति—

यद्यपि आत्मा स्वरूपतोऽपरिस्पन्दी, स्वरूपस्थायी च; तथापि तस्य तादृशस्यापि मोहजविचित्रसंस्कारचक्रवशेन मद्यपवत् स्वरूपव्यामोहे सूक्ष्मेतरदेहसंसर्गः, सति च देहसंसर्गे तत् संस्कारचंक्रम् सुदृढम्, ततश्च देहादिसंसर्गोऽपि सुदृढतमः–तत एव देहाध्यासः ' यथा अहं देहस्वरूपः–परिस्पन्दी, न तु अपरिस्पन्दी देहेतर आत्मरूपः, ' सत्यां च तादृशि भ्रान्तौ धनाध्यासः, भार्याध्यासः, पुत्राध्यासः, परिवाराध्यासः, विविधधर्माद्यनेकसंप्रदायाध्यासः, जडाध्यासश्च–तत एव च संसारावस्थानम्–अनन्तकालं संसारसंसरणं च, एते परिस्पन्दिन एव अत्र प्रमातृपदेन विवक्षिताः–तेषां तादृशामेव शास्त्रादशरणप्रयोजनत्वात् इति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्र विवक्षितेषु प्रमातृपदवाच्येषु सर्वेष्वपि आत्मविशुद्धिजन्यतारतम्येन प्रमातृविशुद्धितरतमता अवबोध्या, यद्यपि देहस्थिताः सर्वेऽपि परिस्पन्दिनः आत्मानः प्रमातृकोटिं प्रविष्टा अपि तेषु आत्मविशुद्धिप्रकर्षजन्यो विशेषोऽवबोध्य एव इति हृदयम्.

अत्र प्रमातृविषये आक्षेप–परिहारौ—

अयम् आत्मरूपः प्रमाता केवलम् अनुभूतिविषयः–वेदान्ता अपि एनम्–' यतो वाचो निवर्तन्ते ' ' तन्न तन्न ' इत्यादिना च अनुभूतिविषयमेव आहुः. जिनागमा अपि ' सव्वे सरा निअट्टन्ति ' ' तक्का जत्थ न विज्जइ ' इत्यादिना च तं तादृशमेव समर्थयांचक्रुः–अत एव नायं शब्दगम्यः, शास्त्रगम्यः, तर्कगम्यश्च. तत एव च अत्र विषये बहूनि मतान्तराणि संजातानि. केचित्तु तं देहरूपमेव नश्वरं मन्वते. अपरे–अर्वाचीनास्तथागतपथजीविनस्तं क्षणनश्वरं स्वीकुर्वते, अन्ये सांख्यास्तं अकर्तारम्, भोक्तारं च मन्यन्ते, अपरे तं व्यापकं विदन्ति, जैनास्तु तं परिस्पन्दिनम्, देहव्यापिनं, कर्मकर्त्तारम्, कर्मभोक्तारं च चिन्वते. अत्र अस्य अनुभवविषयत्वेनैव कतरत् मतं श्रेयः, सत्यं च इति निर्णेतुमसुकरम्. तथापि तार्किकपद्धत्या तर्करुचिजिज्ञासुप्रीत्यर्थमेव अत्र किंचित् चर्च्यते.

आक्षेपः—

" अदृश्यत्वादरूपित्वाज्जीवो नास्त्येव भेदभाक् ।
अनुभूतेरगम्यत्वान्नृशृङ्गत्येव केवलम् ॥ ४५ ॥
देह एव वा जीवोऽस्ति प्राणरूपोऽथवा च सः ।
इन्द्रियात्मा मनोरूपो नैवं भिन्नो ह्यलक्षणः ॥ ४६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदि स्याद् भेदवान् जीवोऽनुभूयेत कथं न हि ।
यदस्ति सकलं तत् तु ज्ञायते कच-काचवत् ॥ ४७ ॥
अरेऽतो नैव आत्माऽस्ति ततो मुक्तिप्रथा वृथा ।
एनामाभ्यन्तरीं रेकाम् उत्कीलय प्रभो ! प्रभो ! " ॥ ४८ ॥

परिहारः—

अध्यासाद् भासिता देह-देहिनोः समता न सा ।
तयोर्द्वयोः सुभिन्नत्वाल्लक्षणैः प्रकटैरहो ! ॥ ४९ ॥
अध्यासाद् भासिता देह-देहिनोः समता न सा ।
तयोर्द्वयोः सुभिन्नत्वादसिकोशायितौ हि तौ ॥ ५० ॥
दृष्टेर्द्रष्टाऽस्ति यो वेत्ति रूपं सर्वप्रकारगम् ।
भात्यऽबाध्याऽनुभूतिर्या साऽस्ति जीवस्वरूपिका ॥ ५१ ॥
स्वस्वविषये संज्ञानं प्रतीन्द्रियं विभाति भोः ! ।
परंतु तेषां सर्वेषां जागर्ति मानमात्मनि ॥ ५२ ॥
न तद् जानाति देहोऽयं नैव प्राणो न चेन्द्रियम् ।
सत्तया देहिनो देहे, तत्प्रवृत्तिं निबोध रे ! ॥ ५३ ॥

[तत्प्रवृत्तिम्-देहप्रवृत्तिम्-यदि न स्याद् देहे आत्मा, ततः सोऽपि (देहोऽपि) कथं प्रवृत्तिं विधातुं शक्नुयात्-इति तत्त्वम्]

योऽवस्थासु समस्तासु ज्ञायते भेदभाक् सदा ।
चेतनतामयः स्पष्टः स ह्यात्मा नान्यलक्षणः ॥ ५४ ॥
घटादिसर्वं जानासि अतस्तन्मन्यते शिशो ! ।
तं न जानासि ज्ञातारम् तद्ज्ञानं ब्रूहि कीदृशम् ॥ ५५ ॥
कृशे देहे घना बुद्धिरघना स्थूलविग्रहे[1] ।
स्याद् देहो यदि आत्मैव नैवं तु घटना भवेत् ॥ ५६ ॥
केवलं भिन्न एवास्ति स्वभावो जड-जीवयोः ।

१ विग्रहः—शरीरम्—स्थूले शरीरे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कदापि न तयोरैक्यम् द्वैतं कालत्रिके तयोः ॥ ५७ ॥
आत्मानं शङ्कते आत्मा स्वयमज्ञानतो ध्रुवम् ।
यः शङ्कते स वै आत्मा स्वेनाहो ! स्वीयशङ्कनम् " ॥५८॥

आक्षेपः—

" शिष्ये भगवता प्रोक्ता आत्मास्तित्वस्य युक्तयः ।
ततः संभवनं तस्य ज्ञायतेऽन्तर्विचारणात् ॥ ५९ ॥
तथाऽपि तत्र शङ्काऽऽत्मा नश्वरः, नाऽविनश्वरः ।
देहसंयोगजन्मास्ति देहनाशात् तु नाशभाक् ॥ ६० ॥
अथवा क्षणिकं वस्तु परिणामि प्रतिक्षणम् ।
तदनुभवगम्यत्वान्नात्मा नित्योऽनुभूयते " ॥ ६१ ॥

परिहारः—

देहमात्रं तु संयोगि दृश्यं रूपि जडं घनम् ।
जीवोत्पत्ति-लयावत्र नीतौ केनानुभूतिताम् ? ॥ ६२ ॥
उत्पत्ति-लयबोधौ तु यस्यानुभववर्तिनौ ।
स ततो भिन्न एव स्याद् नान्यथा बोधनं तयोः ॥ ६३ ॥
दृश्यन्ते ये तु संयोगा ज्ञायन्ते ते सदात्मना ।
नात्मा संयोगजन्योऽतः किन्त्वात्मा शाश्वतः स्फुटम् ॥६४॥
जडादुत्पद्यते जीवो जीवादुत्पद्यते जडम् ।
एषाऽनुभूतिः कस्यापि कदापि क्वापि नैव रे ! ॥ ६५ ॥
यस्योत्पत्तिस्तु केभ्योऽपि संयोगेभ्यो न जायते ।
न नाशः संभवेत् तस्य जीवोऽतो ध्रुवति ध्रुवम् ॥ ६६ ॥
क्रोधादितारतम्यं यत् सर्प-सिंहादिजन्तुषु ।
पूर्वजन्मजसंस्कारात् तत् ततो जीवनित्यता ॥ ६७ ॥
आत्माऽस्ति द्रव्यतो नित्यः पर्यायैः परिणामभाक् ।
बालादिवयसो ज्ञानं यस्मादेकस्य जायते ॥ ६८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षणिकं वस्त्विति ज्ञात्वा यः क्षणिकं वदेदहो !।
स वक्ता क्षणिको नास्ति तदनुभवनिश्चितम् ॥ ६९ ॥

[यदि वक्ता (आत्मा) क्षणिकः स्यात् तदा पूर्वं ज्ञात्वा पश्चात् स एव वक्तुं कथं शक्नुयात् इति तत्त्वम्]

कदापि कस्यचिन्नाशो वस्तुनो नैव केवलम् ।
चेन्नश्येत् चेतना सा तु कामवस्थां समाश्रयेत् ? ॥ ७० ॥

[पूर्वार्धं तु स्पष्टम् । उत्तरार्धे तु–यदि चेतनाऽपि घटवद् नाशं प्राप्नुयात् तदा यथा घटखण्डानि पार्थिवदशां समाश्रयन्ति, वा निमित्तवशतः परिणामान्तरमपि प्राप्नुवन्ति तथा चेतनाऽपि नश्यन्ती कां दशां यायात् केषु वा अणुषु मीलेत् ?–इति तत्त्वम्. उत्तरं तु–चेतना जडतोऽत्यन्तं भिन्नत्वेन न क्वापि यातुम्, स्वयं वा क्वापि मिश्रयितुं शक्ता–अत एव सा न घटवद् नश्यन्ती अस्ति]

आक्षेपः—

" आत्मा नो कर्मणः कर्त्ता कर्मकर्त्रऽस्ति कर्म वै ।
वा सहजः स्वभावः स्यात् कर्मणो जीवधर्मता ॥ ७१ ॥
स्यादसंगः सदा जीवो बन्धो वा प्राकृतो भवेत् ।
वेश्वरप्रेरणा तत्र ततो जीवो न बन्धकः ॥ ७२ ॥
ततः केनापि हेतुना मोक्षोपायो न गम्यते ।
जीवे कर्मविधातृत्वं नास्त्यस्ति चेन्न नश्यताम् " ॥ ७३ ॥

[उत्तरार्धे तु-जीवे कर्मविधातृत्वं न सङ्गतिमङ्गति, अथ अङ्गति चेत्, तस्य स्वाभाविकत्वेन तद् नहि नश्येत्–अतश्च न मोक्षोपायः–इति पूर्वपक्षहृदयम्]

परिहारः—

चेतनप्रेरणा न स्यादादद्यात् कर्म कः खलु ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रेरणा जड़जा नास्ति वस्तुधर्मो विचार्यताम् ॥ ७४ ॥
यदि जीवक्रिया न स्यात् संग्रहो नैव कर्मणः ।
अतो न सहजो भावो नैव वा जीवधर्मता ॥ ७५ ॥
यदि स्यात् केवलोऽसंगः कथं भासेत न त्वयि ? ।
तत्त्वतोऽसंग एवास्ति किंतु तन्निजबोधने ॥ ७६ ॥

[निजबोधने-निजस्वरूपबोधे जाते सति आत्मा तत्त्वतः -असंग एव प्रतीयते-इति तत्त्वम्]

नेश्वरः कोऽपि कर्त्ताऽस्ति स वै शुद्धस्वभावभाक् ।
यदि वा प्रेरके तत्र मते दोषप्रसङ्गता ॥ ७७ ॥
यदाऽऽत्मा वर्तते सौवे स्वभावे तत्करस्तदा ।
यदाऽऽत्मा वर्ततेऽसौवे स्वभावेऽतत्करस्तदा ॥ ७८ ॥

आक्षेपः—

स्याद् आत्मा कर्मणः कर्त्ता किन्तु भोक्ता न युज्यते ।
किं जानाति जडं कर्म येन तत् फलदं भवेत् ॥ ७९ ॥
भवेदीश्वरः फलदस्तदाऽऽत्मा भोगभाग् भवेत् ।
अप्यैश्वर्यं न युज्येत ईश्वरे फलदे मते ॥ ८० ॥

[ईश्वरे फलदे मते-स्वीकृते सति ईश्वरस्य ऐश्वर्यमेव न घटामटति]

असिद्धे चेश्वरे नैव युज्यते जगतः स्थितिः ।
शुभाऽशुभविपाकानां ततः स्थानं न विद्यते ॥ ८१ ॥

परिहारः—

भावकर्म निजा क्लृप्तिरतश्चेतनरूपता ।
जीववीर्यस्य स्फूर्तेस्तु लाति कर्मचयं जडम् ॥ ८२ ॥

४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषं सुधा न वित्तोऽपि खादकः फलमाप्नुयात् ।
एवमेव शुभाऽशुभकर्मणो जीवभोक्तृता ॥ ८३ ॥

एको रङ्कः प्रजापोऽन्यः इत्यादिभेददर्शनम् ।
कार्यं नाऽकारणं क्वाऽपि वेद्यमेवं शुभाशुभम् ॥ ८४ ॥

ईश्वरः फलदस्तत्राऽऽवश्यको न हि कर्मणि ।
परिणमेत् स्वभावात् तद् भोगाद् दूरं विनश्यति ॥ ८५ ॥

तत्तद्भोग्यविशेषाणां स्थानं द्रव्यस्वभावता ।
वार्तेयं गहना शिष्य ! संक्षेपे सर्वथोदिता ॥ ८६ ॥

आक्षेपः—

कर्त्ता भोक्ताऽस्तु जीवोऽपि तस्य मोक्षो न विद्यते ।
व्यतीतोऽनन्तकः कालस्तथाऽप्यात्मा तु दोषभाक् ॥८७।

शुभकर्मकरो जीवो देवादिपदवीं व्रजेत् ।
अशुभकर्मकृज्जीवः श्वभ्रम् न क्वाप्यकर्मकः ॥ ८८ ॥

परिहारः—

यथा शुभाशुभं कर्म जीवव्यापारतः फलि ।
फलवन्निर्वाणमप्यस्य तदव्यापारतस्तथा ॥ ८९ ॥

सदसत्कर्मणो भावादनन्तः समयो गतः ।
संपद्येत तदुच्छेदे जीवे मुक्तिस्वभावता ॥ ९० ॥

आत्यन्तिको वियोगो हि देहादियोगतः खलु ।
तन्निर्वाणं समाख्यातं तत्राऽनन्तसुखैकता ॥ ९१ ॥

आक्षेपः—

मोक्षस्थानं कदापि स्यान्नाऽविरुद्धोपपत्ति तत् ।
अनन्तकालजः कर्मचयश्छेद्यः कथं भवेत् ॥ ९२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वा मतानि सुभिन्नानि नैकोपायप्रदर्शीनि ।
मतं सत्यं तु किं तत्र शक्यैषा न विवेकिता ॥ ६३ ॥
कस्यां जातौ भवेन्मोक्षो वेषे कस्मिंश्च निर्वृतिः ।
निश्चेतुमेतद् नो शक्यं बहुभेदो हि दूषणम् ॥ ६४ ॥
तत एवं हि संसिद्धं मोक्षोपायो न विद्यते ।
जीवादिज्ञानसंप्राप्तौ का स्यादुपकृतिरहा ! ॥ ६५ ॥
प्रश्नपश्नोत्तरे लब्धे समाधिः सकलोऽजनि ।
यदि तत्साधनं विद्यां शिवं श्रेयो भवेच्छिवम् ॥ ६६ ॥

परिहारः—

पश्नोत्तरेण संजाता प्रतीतिस्तव ह्यात्मनि ।
मोक्षोपायस्तथा तात ! एष्यति सहजं मनः ॥ ६७ ॥
अज्ञानं कर्मभावोऽस्ति मोक्षोपायो निजस्थितिः ।
ज्वलिते ज्ञानदीपे तु नश्येदज्ञानतातमः ॥ ६८ ॥
यो यो बन्धस्य हेतुः स्याद् बन्धमार्गो भवेत् स सः ।
बन्धोच्छेदस्थितिर्या तु मोक्षमार्गो भवान्तकः ॥ ६९ ॥
रागो द्वेषस्तथाऽज्ञानं कर्मणां ग्रन्थिरग्रगा ।
यस्मात् तकन्निवृत्तिः स्याद् मोक्षमार्गः स एव भोः ! ॥१००॥
संश्चेतनामयो जीवः सर्वाभासविवर्जितः ।
प्राप्यते स यतः शुद्धो मोक्षमार्गः स एव भोः ! ॥१०१॥
अनन्तभेदकं कर्म चाष्टौ मुख्यानि तेष्वपि ।
तत्रापि मोहना मुख्या वक्ष्ये तद्धनने विधिम् ॥ १०२ ॥
मोहनं द्विविधं तत्र दृष्टि-चारित्रभेदतः ।
बोधं हि दर्शनं हन्याच्चारित्रं रागहीनताम् ॥ १०३ ॥

(दर्शनं हि दर्शनमोहनीयं कर्म बोधम्—आत्मस्वरूप-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बोधम्. चारित्रं च चारित्रमोहनीयं कर्म रागहीनताम्-वीतरागताम् हन्यात् इति तत्त्वम्.)

क्रोधादियोगतः कर्मबन्धः शान्त्यादिघातकः ।
अत्रानुभूतिः सर्वेषां तत्र का संशयालुता ॥ १०४ ॥

मतदृष्ट्याग्रहं त्यक्त्वा विकल्पाचरणं तथा ।
आराध्येतोक्तमार्गो यैः तेषां हि जननाल्पता ॥ १०५ ॥

जातेर्वेषस्य नो भेदो यदि स्यादुक्तमार्गता ।
तां तु यः साधयेत् सद्यो न काचित्तत्र भिन्नता ॥ १०६ ॥

(जातिः ब्राह्मणादिः, शूद्र-चाण्डालादिर्वा.)

कषायस्योपशान्तत्वं मोक्षे रुचिर्हि केवलम् ।
भवे खेदो दया चित्ते सा जिज्ञासा समुच्यते ॥ १०७ ॥

सद्गुरोर्बोधमाप्नुयात् स जिज्ञासुर्नरो यदि ।
तदा सम्यक्त्वलाभः स्यात् आत्मशोधनता अपि ॥ १०८ ॥

मतदृष्ट्याग्रहैर्हीना यद्वृत्तिर्गुरुपादयोः ।
स संलभेत सम्यक्त्वं यत्र भेदो न पक्षता ॥ १०९ ॥

अनुभूतिः स्वभावस्य तल्लक्ष्यं तत्र प्रत्ययः ।
निजतां संवहेद् वृत्तिः सत्यं सम्यक्त्वमुच्यते ॥ ११० ॥

भूत्वा वर्धिष्णु सम्यक्त्वं मिथ्याभासं प्रटालयेत् ।
चारित्रस्योदयस्तत्र वीतरागपदास्थितिः ॥ १११ ॥

केवलं स्वस्वभावस्य स्थिरा यत्र भवेद् मतिः ।
सोच्यते केवलज्ञानं देहे सत्यपि निर्वृतिः ॥ ११२ ॥

स्वप्नोऽपि कोटिवर्षस्य निद्रोच्छेदे समाप्यते ।
विभावोऽनादिजो दूरे नश्येद् ज्ञाने तथा सति ॥ ११३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देहाध्यासो यदि नश्येत् त्वं कर्त्ता न हि कर्मणाम् ।
न हि भोक्ता च तेषां त्वं धर्मस्यैतद् गूढं मतम् ॥ ११४ ॥

मोक्ष एव ततो धर्माद्-मोक्षात्मा च त्वमेव भोः ! ।
अनन्तदर्शनं त्वं च अव्याबाधरूपस्त्वकम् ॥ ११५ ॥

शुद्धो बुद्धश्चिदात्मा च स्वयं ज्योतिः सुखालयम् ।
विचारय ततो विद्धि स्वयं बहु तु किमुच्यते ॥ ११६ ॥

सर्वेषां ज्ञानिनामत्र समाप्तिमेति निश्चयः ।
उक्त्वैवं गुरुणा मौनं समाधौ सहजे धृतम् ॥ ११७ ॥

यदा विभावभावः स्याद् भोक्ता कर्त्ता च कर्मणः ।
यदाऽविभावभावः स्याद् भोक्ता कर्त्ता न कर्मणः ॥११८॥

स्वाभाविक्यस्ति वा वृत्तिः शुद्धा वा चेतनामयी ।
तस्याः कर्त्ताऽस्ति भोक्ताऽस्ति निर्विकल्पस्वरूपभाक् ॥११९॥

उक्तो मोक्षो निजा शुद्धिः स मार्गो लभ्यते यतः ।
संक्षेपेणोदितः शिष्य ! नैर्ग्रन्थः सकलः पथः ॥ १२० ॥

अत एव च—

जीवोऽस्ति स च नित्योऽस्ति कर्त्ताऽस्ति निजकर्मणः ।
भोक्ताऽस्ति च पुनर्मुक्तिर्मुक्त्युपायः सुदर्शनम् ॥ ४३ ॥

षट्स्थानीयं समासेन षड्दर्शन्यपि उच्यते ।
प्रोक्ता सा ज्ञानिभिर्ज्ञातुं परं तत्त्वं धरास्पृशाम् ॥ ४४ ॥

[षण्णां स्थानानां-पूर्वतनश्लोकदर्शितानां समाहारः षट्स्थानी । षण्णां दर्शनानां समाहारः षड्दर्शनी]

आत्मभ्रान्तिसमो रोगो नास्ति भिषग् गुरूपमः ।
गुरोराज्ञासमं पथ्यं ध्यानतुल्यं न चौषधम् ॥ १२९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रेप्सवः परमार्थं ये ते कुर्वन्त्वात्मपौरुषम् ।
भवस्थित्यादिहेतोस्तु न च्छिन्दन्तु निजं बलम् ॥ १३० ॥

आकर्ण्य निश्चितां वाणीं त्याज्यं नैव सुसाधनम् ।
रक्षित्वा निश्चये लक्ष्यमाचर्यः साधनाचयः ॥ १३१ ॥

निश्चयो व्यवहारो वा नाऽत्रैकान्तेन दर्शितः ।
यत्र स्थाने यथायोग्यं तथा तद् युगलं भवेत् ॥ १३२ ॥

सद्व्यवहारहीनाऽस्ति कल्पना मतगच्छयोः ।
निजभानाद् ऋते तात ! निश्चयो न हि सुन्दरः ॥ १३३ ॥

अभूवन् ज्ञानिनः पूर्वं वर्तन्ते ये च नाऽऽगताः ।
विदां तेषां समेषां वै मार्गभेदो न विद्यते ॥ १३४ ॥

सिद्धतुल्यान् समान् जीवान् यो जानाति भवेत् स सः ।
अर्हत्स्थितिर्गुरोराज्ञा निमित्तं तत्र विद्यते ॥ १३५ ॥

उपादानच्छलेनैव निमित्तानि त्यजन्ति ये ।
लभन्ते सिद्धभावं नो भ्रान्ताः स्युस्ते उत ध्रुवम् ॥ १३६ ॥

वक्ति ज्ञानकथां वक्त्राच्चित्तं मोहतमावृतम् ।
यस्य रङ्कस्य मर्त्यस्य ज्ञानिद्रोही स केवलम् ॥ १३७ ॥

दया क्षान्तिः क्षमा साम्यं वैराग्यं ज्ञान-सत्यते ।
मुमुक्षुहृदये नित्यमेते स्युः प्रकटा गुणाः ॥ १३८ ॥

यत्रास्ति मोहनं क्षीणं वा प्रशान्तं भवेत् तकत् ।
वाच्या ज्ञानिदशा साऽन्या भ्रान्तता स्फुटमुच्यते ॥ १३९ ॥

उच्छिष्टाभायमानं वा स्वप्नवद् वेत्ति यो जगत् ।
एषा ज्ञानिस्थितिर्वाच्या शेषं वाग्जालमामतम् ।

देहातीता दशा यस्य देहे सत्यपि वर्तते ।
तज्ज्ञानिचरणे मेऽस्तु वन्दनाऽगणिता त्रिधा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति आत्मा।

अयं च परिस्पन्दी आत्मा विचित्रसंस्कारवशेन भिद्यमानोऽनेकभेदमापन्नोऽत्र संसारे संसरति. तमेव दर्शयति—

स च त्रसरूपः स्थावररूपश्च ॥ ३ ॥

शीतादित्रासं प्राप्य तन्निवारणाय गन्तुं शक्तास्ते त्रसाः. ये च गन्तुं न शक्ताः-केवलं स्थितिशीलाः-ते स्थावराः.

अल्पत्वेन स्थावरान् विभजति—

पृथिवी-जल-तेजो-वायु-वनस्पतयः स्थावराः ॥ ४ ॥

एते च प्रतीताः, एतद् भेदप्रभेदास्तु लोकशास्त्रत एव अवसेयाः, नवरम्-एते स्थावराः एकमात्रव्यक्तविविधस्पर्शेन्द्रियलिङ्गाः, एतेषाम्-आहार-आयुः-स्थित्यादिकं तु प्रज्ञापना-व्याख्याप्रज्ञप्तितो जिनागमतोऽवसेयं तद्विस्तरार्थिना।

तथापि कृपापरो ग्रन्थकारः सामसत एव तान् प्रत्येकं लक्षयति—

तत्र कठिना पृथ्वी ॥ ५ ॥

इतराऽवृत्तिकाठिन्यवत्त्वं पृथिव्या लक्षणम्। वनस्पत्यादौ काठिन्यवत्त्वेन अतिप्रसंगो माभूत्-इति काठिन्ये इतराऽवृत्तित्वं विशेषणम्। इतरपदं पृथिवीतरपरम्। इतरावृत्तित्वमात्रोपादाने जलाऽनलोभयगत-उभयत्वमादाय जल-तेजसोरुभयोर्न स्याद् अतिप्रसङ्ग इति काठिन्यवत्त्वं विशेष्यं न्यवेशि। अत्र वृत्तित्वम् अविष्वग्भावसम्बन्धेन बोध्यम्. तेन यत्किंचित्संबन्धेन उभयत्वस्य वृत्तित्वस्य न क्षतिः। यदा च सा पृथ्वी खनीगता-यावच्च व्याघातरहिता सचैतन्या तदा चेतनरुपा, यदा तु सा न तथा तदा अचेतना-जडा इति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा द्विविधा नित्याऽनित्या च ॥ ६ ॥

सा पृथिवी द्रव्यार्थिकनयेन–द्रव्यरूपेण–नित्या, पर्यायार्थिकनयेन–कार्यरूपेण अनित्या, साम्प्रदायिकं नयस्वरूपमग्रे वक्ष्यते। नित्याऽनित्यत्वपक्षस्तु 'अनेकजयपताका' दिभ्यो बोद्धव्यः। एवमेव जलादिष्वपि नेया नित्याऽनित्यता.।

पृथिव्यनन्तरं जलं लक्षयति—

शीतस्पर्शवज्जलम् ॥ ७ ॥

तमोऽवृत्तिशीतस्पर्शवत्त्वं जलस्य लक्षणम् तमस्यपि समस्ति शीतस्पर्शवत्त्वम्, अत उक्तम्—'तमोऽवृत्ति' इति। तावन्मात्रोपादाने तमोभिन्ने अनिलाऽनलादौ अतिप्रसङ्ग इत्यतो विशेष्यम्। एतदपि पृथिवीवत् चैतन्यवत् तद्भिन्नं च, तथा तथैव नित्यम्, अनित्यमपि।

उष्णस्पर्शवत् तेजः ॥ ८ ॥

स्पष्टार्थम्। शेषं पूर्ववत्।

विजातीयस्पर्शवान् वायुः ॥ ९ ॥

विजातीयस्पर्शवत्त्वं वायोर्लक्षणम्। किमिदं वैजात्यम्? –वैजात्यं नाम पृथिव्यादि–अवृत्तित्वरूपं ज्ञेयम्। अन्यत्तु प्राग्वत्।

प्रायोऽङ्कुरसम्बन्धी वनस्पतिः ॥ १० ॥

अविष्वग्भावसंबन्धेन अङ्कुरवत्त्वं वनस्पतेर्लक्षणम्। शेषं तु चेतनाऽचेतन–नित्याऽनित्यादि पूर्ववद् वाच्यम्. प्रायो–ग्रहणं निर्मूली–प्रभृतीनामपि वनस्पतित्वख्यापनार्थम्. तत्र अङ्कुरोद्गमस्य लोकेऽप्रसिद्धत्वात्। अत्र तत्तन्नामकर्मोदयवत्वसंबन्धेन पृथिव्यादिमत्त्वं पृथिव्यादिजीवानां लक्षणमवसेयमिति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्यपि परमाणूनां सर्वजातीयरूप–रस–स्पर्श–गन्ध–शब्दवत्त्वेन हिमेऽपि काठिन्यस्य, जलेऽपि उष्णस्पर्शस्य, अग्नावपि मणिसन्निधाने शैत्यस्य सद्भावात् काठिन्यमेव पृथिव्याम्, शीतस्पर्शमेव जलम्, उष्णस्पर्शभागेव अग्निः–इत्यादि व्यवस्थानं नौचितीमञ्चति, तथापि लौकिकमेव व्यवहारमाश्रित्य अत्र इदं ग्रन्थकृता विभक्तम्–यतो हि शास्त्राद् रूढिर्बलीयसी इति दिक्, अत्र विस्तरस्तु षड्दर्शनसमुच्चयबृहट्टीकातोऽवसेयः पुद्गलप्रकरणगत इति स्थावराः।

अथ स्थावरानन्तरं त्रसान् विभजति—

तद्भिन्नाः त्रसाः ॥ ११ ॥

परिस्पष्टसुखादिलिङ्गकत्वम्, त्रसनामकर्मोदयवत्त्वं वा त्रसलक्षणम्—

ते चतुर्विधाः ॥ १२ ॥

ते त्रसाः द्वीन्द्रिय–त्रीन्द्रिय–चतुरिन्द्रिय–पञ्चेन्द्रियभेदात् चतुर्विधाः । त्रसानाम् इन्द्रियाणि द्वीन्द्रियादिशब्देनैव प्रतीतानि, तेषां पूर्वोक्तानां स्थावराणां च श्वास–निःश्वास–आहार–निहार–विहार—आयुःस्थिति–कर्मबन्ध—विविधचेष्टादिकं सर्वं प्रज्ञापना–श्रीभगवतीतः समवबोध्यम् । तद्भेदप्रभेदा अपि तत एव समवगम्याः । तेषाम् " अमुकस्य इमानि इयन्ति इन्द्रियाणि ' इत्यादिको विभागः अग्रे वक्ष्यते.

पूर्वदर्शितमपि इन्द्रियस्वरूपं विस्तरतो दर्शयितुकामो ग्रन्थकारः अत्र एकेन्द्रियादिप्रसङ्गतस्तल्लक्षणादिना पुनरपि सम्प्रदायरुचिभ्यः शिष्येभ्यः प्ररूपयति—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इन्द्रलिङ्गम् इन्द्रियम् ॥ १३ ॥

'इन्द्रस्य लिङ्गम्' इन्द्रियम्–इति व्युत्पत्त्या इन्द्रस्य आत्मनः तदावरणक्षयोपशमे सति स्वयमर्थान् ग्रहीतुमसमर्थस्य यद् अर्थोपलब्धिनिमित्तं तदेव इन्द्रियम्–इत्यर्थः।

तद् द्विविधम्–द्रव्येन्द्रियम् भावेन्द्रियं च ॥ १४ ॥

तद् इन्द्रियं द्विविधम्–द्विप्रकारमिति। उपयोगानात्मकं द्रव्येन्द्रियम्, उपयोगात्मकं भावेन्द्रियम्। उपयोगश्चात्र सत्तारूपः, प्रवर्तमानो वा ग्राह्यः, ततश्च न लब्धिरूपे भावेन्द्रिये अव्याप्तिः। तदुक्तं आगमे–"अणुवओगो दव्वं, उवओगो भावो" इति।

पुनस्तत् प्रत्येकमपि द्विविधम्–इत्याह—

तत्र आद्यं द्विप्रकारम्-निर्वृत्तिरूपम्, उपकरणरूपं च ॥१५॥

तत्र द्रव्येन्द्रिय–भावेन्द्रिययोर्मध्ये आद्यम्–प्रथमं द्रव्येन्द्रियं द्विप्रकारकम्–द्विरूपमिति। निर्वर्त्यते–निष्पाद्यते इति व्युत्पत्त्या कर्मनिष्पन्नत्वं निर्वृत्तिरूपम्। तदपि द्विविधम्–बाह्याऽभ्यन्तरभेदात्। तत्र तावद् बाह्यनिर्वृत्तेः स्वरूपमाह—आत्मप्रदेशाधिकरणकनामकर्मेन्द्रियापादितावस्थाविशेषपुद्गलप्रचयरूपम्। आभ्यन्तरनिर्वृत्तेः स्वरूपं तु नेत्रादीन्द्रियसंस्थानावस्थितात्मप्रदेशाकृतिवृत्तिरूपम्। उपकरणेन्द्रियमपि द्विविधम्-बाह्याभ्यन्तरभेदात्। निर्वृत्त्युपकारजनकत्वम् उपकरणेन्द्रियलक्षणम्–बाह्यम् अक्षिपत्र–पक्ष्मद्वयादि। आभ्यन्तरं तु कृष्णशुक्लमण्डलरूपम्। एवं शेषेष्वपि ज्ञेयम् इति द्रव्येन्द्रियम्।

अन्त्यमपि द्विविधम्–लब्धिरूपम् उपयोगरूपं च ॥ १६ ॥

अन्त्यं भावेन्द्रियं द्विविधम्–द्विप्रकारम्–लम्भनं लब्धिः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा च ज्ञानावरणक्षयोपशमविशेषस्वरूपा, तत्सन्निधानाद् आत्मा द्रव्येन्द्रियम् व्यापारयति, तन्निमित्त आत्मनः परिणामः उपयोगः–तदुभयं भावेन्द्रियम् इति भावेन्द्रियम् ।

पुनस्तानि चतुर्विधान्यपि प्रत्येकशः पञ्च प्रकाराणि इत्याह—

स्पर्शन-रसन-घ्राण-चक्षुः–श्रोत्राणि ॥ १७ ॥

एतानि क्रमेण स्पर्श-रस-गन्ध-वर्ण-शब्दविषयाणि । स्वस्वविषयोपलब्धिनिमित्तत्वे सति इन्द्रियत्वम्–इति पञ्चानामपि इन्द्रियाणां विशेषलक्षणं ज्ञेयम् । अत्र लक्षणे विशेषण–विशेष्ययोः सार्थक्यं स्पष्टमेव, अतोऽनुक्तमपि स्वयमूह्यम् ।

केषां कतिसंख्याकानि इन्द्रियाणि ? इत्याकाङ्क्षाशमनाय आह—

तत्र वनस्पत्यन्तानामेकम् ॥ १८ ॥

तत्र उक्तपञ्चविधायां पृथिव्यादि–वनस्पत्यन्तानां पञ्चानामित्यर्थः, तेषामेकं स्पर्शनेन्द्रियमिति ।

अवशिष्टानां त्रसानां द्वीन्द्रियादिमत्त्वं केषाम् ? इति जिज्ञासायामाह—

कृमि–पिपीलिका–भ्रमर–मनुष्यादीनामेकैकवृद्धानि ॥१९॥

एकैकेन वृद्धानि एकैकवृद्धानि इति समासेन उत्तरोत्तरम् एकाधिकेन्द्रियवत्त्वं लभ्यते । तच्चेत्थम्–कृमि–गण्डूपद–शङ्ख–शुक्ति–जलौकःप्रभृतीनि द्वीन्द्रियाणि–तेषां स्पर्शनं–सरसनम् - रसनाधिकमिति। पिपीलिका–कुन्थु–मत्कुणादीनि त्रि–इन्द्रियाणि–तेषां स्पर्शन–रसन–घ्राणानि इति । भ्रमर–दंश–वृश्चिकादीनि चतुर्–इन्द्रियाणि तेषां तानि एव त्रीणि इन्द्रियाणि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नेत्राधिकानि। मनुष्य-नारक-देवादीनि-पञ्च-इन्द्रियाणि तेषां पूर्वोक्तान्येव चत्वारि इन्द्रियाणि श्रोत्राधिकानि-इति।

इन्द्रियनिरूपणानन्तरं प्रसङ्गतः अनिन्द्रियं निरूपयति—

अनियतविषयत्वे सति इन्द्रलिङ्गत्वम् अनिन्द्रियत्वम् ॥२०॥

'सत्य'न्तमात्रोपादाने गगनादौ अतिव्याप्तिः, अतो विशेष्यम्. केवलं विशेष्योपादाने चक्षुरादौ अपि अतिप्रसक्तिः, अतो विशेषणम्-इति उभयोः विशेष्यविशेषणयोः साफल्यम्, लक्षणस्य च अदुष्टत्वम्। अनिन्द्रियं-नोइन्द्रियम्-मनः इत्यर्थः। अत्र 'अनुदरा कन्या' इतिवत् नञ् ईषदर्थे।

तद् द्विविधं द्रव्य-भावभेदात् ॥ २१ ॥

तद् अनिन्द्रियं द्विविधं-द्विप्रकारम् उक्तभेदात्।

तत्र द्रव्यमनो लक्षयति—

पुद्गलविपाकिकर्मोदयापेक्षत्वम् ॥ २२ ॥

भावमनो भावयति—

वीर्यान्तराय-नोइन्द्रियावरणक्षयोपशमापेक्षकात्मवि-शुद्धिरूपत्वम् ॥ २३ ॥

अधुनैव निरूपितं मनः, अतः तद्वताम् च निरूपणं प्रसङ्गप्राप्तम्-ततोऽथ तदेव निरूपयति सूत्रकारः—

समनस्काऽमनस्काश्च ॥ २४ ॥

समनस्क-शब्दोऽत्र मनुष्यादिवद् विशेषस्पष्टमनस्सा-हित्यसूचकः, अमनस्कशब्दस्तु अत्र उत्तरत्र च अनुदरा कन्या-वद् अल्प-अस्पष्टमनःसाहित्यसूचकः। एते त्रसा उभयप्रकारा अपि प्राप्यन्ते; तेषु समनस्काः मनुष्य-पशुप्रभृतयः, अमन-स्कास्तु द्वीन्द्रियादिपञ्चेन्द्रियपर्यन्ताः कीटविशेषाः—संज्ञा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हीनापरपर्याया लोकप्रतीता जीवविचारादिग्रन्थतोऽवबोध्याः। एते सूक्ष्मेण मनसा युता अपि अमनस्काः। अत्र विषये श्रीयशोविजयमहोपाध्याया एतदेव मतं संवदन्ति. तथाहि— "न च तेन द्वीन्द्रियादीनां समनस्कतापत्तिः, कपर्दिकासत्तया धनित्वस्य इव, एकया गवा गोमत्त्वस्य इव–सूक्ष्मेण मनसा समनस्कत्वस्य आपादयितुम् अशक्यत्वात्" (ज्ञानबिन्दौ पृ. ११४ भा.)

स्थावरास्तु अमनस्काः ॥ २५ ॥

ये तु जीवा स्थावरशब्दवाच्याः—ते सर्वेऽपि प्रायः अल्पतम–अस्पष्टतममनस्सहिताः–अत एव च अमनस्काः–एते च लज्जालुलतादयः स्थावराः प्रतीता एव।

इन्द्रियाणि, मनः, तत्स्वामिनश्च निरूप्य–अथ प्रसङ्ग-प्राप्तानि जीवाधिष्ठितानि शरीराणि, तत्स्वामिनश्च कथयितुम् आदौ तावत् शरीरसामान्यमेव लक्षयति—

विशिष्टनामकर्मोदयापादितवृत्तिमत् शरीरम् ॥ २६ ॥

विशीर्यते–इति व्युत्पत्त्या वा विशरणशालित्वं शरीर-सामान्यलक्षणम्।

तद्भेदान् आह—

तद् औदारिक–वैक्रिय–आहारक–तैजस–कार्मण-भेदात् पञ्चविधम् ॥ २७ ॥

औदारिकमवलक्षयति—

उदारताप्रयोजनकम्, उदरगताहारपुष्टिपोष्यं वा औदारिकम् ॥ २८ ॥

उदारं स्थूलं प्रयोजनमस्य–इति व्युत्पत्त्या शरीरविशेष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाचकस्य औदारिकपदस्य कोऽर्थः ? इत्याशङ्कायां तत्तच्छब्दार्थमाह–उपादानात् प्रभृति अनुसमयमुद्गच्छति नाम वर्धते इत्युदारम्। तल्लक्षणं तु सजातीयेतरव्यावर्तनाय प्रोक्तं प्राक्।

वैक्रियं विवृणोति––

विक्रियाफलकं वैक्रियम् ॥ २९ ॥

विविधं क्रियते नाम–एकं भूत्वा अनेकं भवति, अनेकं भूत्वा एकं भवति, अणु भूत्वा महद् भवति, महद् भूत्वा अणु भवति–इत्यादि विक्रियायां जायते तद् वैक्रियमिति।

आहारकमालेखयति—

निर्वृत्त्यर्थकम् आहारकम् ॥ ३० ॥

आह्रियते–निर्वर्त्यते इति आहारकम्। केन ? इति चेत् प्रमत्तसंयतेन चतुर्दशपूर्वधरेण इति पूरणीयम्। किमर्थम् ? इति चेत् सूक्ष्मपदार्थनिर्ज्ञानार्थम्, असंयमपरिजिहीर्षया वा संदेहनिवारणाय इति।

तैजसम् उत्तेजयति—

तेजोनिमित्तं तैजसम् ॥ ३१ ॥

तेजसो विकारो तेजोमयम्, तेजः स्वतत्त्वं शापाऽनुग्रहप्रयोजनत्वामिति।

कार्मणं परिकर्मयति—

कर्मोपादानं कार्मणम् ॥ ३२ ॥

कर्मणो विकारः कार्मणम्–कर्म उपादानं यस्य तत् कार्मणमित्यर्थः। कर्मणा–क्रियया–प्रवृत्त्या संगृह्यमाणत्वेन कार्मणमभिधीयते। एतदपि सर्वेषामेव देहधारिणाम्। नवरम् एतदेव कार्मणं शरीरं सर्वशरीरमूलभूतम्–संसारकारणं च।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वस्तुतस्तु ये निजभाननाशकाः कषायादिसंस्काराः ते एव कार्मणपदवाच्याः तेषां भावकर्मत्वेन सुप्रतीतत्वात्। एतत् तु कार्मणं शरीरं कर्मपुद्गलमयत्वेन द्रव्यतः कर्मरूपम्। यद्यपि सर्वाण्येव शरीराणि कर्मकृतानि, तथापि न तानि कार्मणानि- कर्ममयानि, किन्तु कर्मनिमित्तकानि एतत् तु कर्ममयमेव इति कार्मणेतरयोर्विशेषः--औदारिकम्, औदारिकपुद्गलमयम्, वैक्रियं वैक्रियपुद्गलमयम्, आहारकम् आहारकपुद्गलमयम्, तैजसं च तेजःपुद्गलमयम्,-एतानि चत्वार्यपि तत्तत्पुद्गल- मयानि कर्मसहकारीणि, कार्मणं तु कर्ममयमेव। एतदेव च वैदिकशासने 'लिङ्गशरीर' नाम्ना प्रथितमिति।

ननु-औदारिकवत् इतरेषां कस्मान्न चाक्षुषत्वम्? अत आह—

परं परं सूक्ष्मम् ॥ ३३ ॥

पर-शब्दस्य अनेकार्थकत्वेऽपि विवक्षातः व्यवस्था इति अर्थगतिरिष्टा-यथा औदारिकं स्थूलम्, ततः सूक्ष्मं वैक्रियम्, ततः सूक्ष्मम् आहारकम्, ततः सूक्ष्मं तैजसम्, तैजसात् कार्मणं सूक्ष्मम् इत्यर्थः।

वीप्सितपरपदसहोच्चरितसूक्ष्मशब्दबोध्यस्य प्रदेशपदवाच्य- परमाण्वपकृष्टत्वं मा जायताम्-अत आह—

प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात् ॥ ३४ ॥

प्रदिश्यन्ते अविभागित्वेन-प्ररूप्यन्ते-इति प्रदेशाः पर- माणवः। संख्यामतीतोऽसंख्येयः, असंख्येयो गुणो यस्य तद् असंख्येयगुणम्। कुतः? प्रदेशतः-न तु अवगाहतः। 'परं परम्' इत्यनुवृत्तेः 'आ कर्मणात्' प्रसङ्गे सति तन्निवृत्त्यर्थ--

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माह—' प्राक् तैजसात् ' इति । औदारिकाद् असंख्येयगुणप्रदेशं वैक्रियम्, ततः असंख्येयगुणप्रदेशमाहारकम् इति ।

उत्तरयोः तैजसकार्मणयोः समप्रदेशसंशयस्य दूरीकर्तुमाह—

अनन्तगुणे परे ॥ ३५ ॥

' प्रदेशतः ' इत्यनुवर्तते, तेनैव अभिसंबन्धः क्रियते–आहारकात् तैजसं प्रदेशतोऽनन्तगुणं, ततः कार्मणम् अनन्तगुणमिति ।

औदारिकशरीरयुतो गच्छन् प्राणी भित्त्यादौ प्रतिघातं लभमानस्ततो निवर्तते, तथा तैजस–कार्मणमात्रयुतोऽपि यत्र क्वापि संचरन् प्राणी प्रतिघातं लभते न वा ? इति निराकर्तुं व्याकुरुते—

पुनरप्रतिघाते ॥ ३६ ॥

मूर्तस्य मूर्तान्तरेण व्याघातः प्रतिघातः, मूर्तत्वेऽपि सूक्ष्मपरिणामात् स नास्ति–अनयोः—इति अप्रतिघाते । मूर्तमपि तेजः सूक्ष्मत्वेन अयःपिण्डे प्रविशद् नाऽऽयसैः परमाणुस्कन्धैः प्रतिहन्यते, तथैव मूर्तयोरपि तैजस–कार्मणयोर्नास्ति क्वापि वज्रपटलपर्वतादिषु प्रतिघात इति ।

औदारिकादिभ्योऽनयोः किमियानेव विशेषः ? उताऽस्ति अन्योऽपि कश्चन ? इति वचः समाधातुं संधत्ते—

अनादिसम्बन्धे च ॥ ३७ ॥

' च ' शब्दो व्यवस्थितविकल्पार्थः । अनादिसम्बन्धे चात् तु सादिसम्बन्धे अपि । कार्यकारणभावसंतत्या बीजवृक्षवत् जीवेन तयोः अनादिकः सम्बन्धः । विशेषापेक्षया तु सादि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोऽपि तयोः सम्बन्धः। तथाहि—कर्मणां चयोत्पत्तिशालित्वेन तैजसपुद्गलानां तु परावृत्तिधर्मत्वेन यत् स्यात् मनुजगति-सहचारि कार्मणं शरीरम्, तैजसं वा शरीरं न तदेव स्यात् देवगतिसहचारि, तिर्यग्गतिसहचारि वा, अत एव तत्तद्विशेष-गत्यपेक्षया ते अनादिसम्बन्धे अपि स्यातां सादिसम्बन्धे। विशेषतासापेक्षत्वेन च सादिसंबन्धस्य न अनादिसंबन्धेन विरोधः। औदारिक–वैक्रिय–आहारकाणि शरीराणि यथा जीवस्य कादाचित्कानि, न तथा तैजसकार्मणे. एते तु नित्य-संबन्धिनी हि आ संसारक्षयात्–इति।

एते तैजस–कार्मणे किं कस्यचिदेव भवतः? उत अविशेषेण सर्वस्य? इत्याह—

ते सर्वस्य ॥ ३८ ॥

सर्वशब्दो निरवशेषवाची, निरवशेषस्य संसारिणो जीवस्य ते द्वे अपि शरीरे भवतः।

अविशेषाभिधानात् तैरौदारिकादिभिरपि सर्वस्य संसारिणो यौगपद्येन सम्बन्धप्रसङ्गे सति संभाविशरीरं प्रदर्शयन् आह—

तदादीनि भाज्यानि युगपद् एकस्मिन् आ चतुर्भ्यः ॥३९॥

तच्छब्दः प्रकृततैजस–कार्मणप्रतिनिर्देशार्थः- ते तैजस–कार्मणे आदिर्येषां तानि–तदादीनि–भाज्यानि–विकल्प्यानि, कुतः? आ चतुर्भ्यः. युगपद् एकस्य आत्मनः कस्यचिद् द्वे –तैजस- कार्मणे, अपरस्य त्रीणि-औदारिक–तैजस–कार्मणानि, वैक्रिय–तैजस–कार्मणानि वा, अन्यस्य पुनश्चत्वारि–औदा-रिक–आहारक–तैजस–कार्मणानि इति विभागः। वैक्रियाऽऽ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हारकयोर्यौगपद्यासंभवेन न कदाचिदपि एकस्यैव आत्मनो युगपदेव शरीरपञ्चकं भवेत् इति ।

तेषामेव शरीराणां विशेषप्रतिपत्त्यर्थं प्रतिपादयति—

निरुपभोगमन्त्यम् ॥ ४० ॥

अन्ते भवम्—अन्त्यम्. किं तत् ? कार्मणम् । इन्द्रियादि-प्रणालिकया शब्दादीनामुपलब्धिरुपभोगः, तदभावात् एतत् कार्मणं निरुपभोगम् ।

प्रादुर्भावमापद्यमानानि अमूनि शरीराणि किमविशेषेण संभवन्ति ? उतास्ति कश्चिद् विशेषः ? इति स्पष्टयितुमाह—

गर्भसंमूर्छनजमाद्यम् ॥ ४१ ॥

सूत्रक्रमापेक्षया–आदौ भवमाद्यम्–औदारिकमित्यर्थः । यद् गर्भजम्–मातृ–पितृसंयोगेन जायमानम्–जरायुजम्–अण्ड-जम्–पोतजम्, यच्च संमूर्छनजम् मातृ-पितृसंयोगमन्तरा–अनल–जल–स्थलादिसामग्र्या–संभविष्णु तदेतद् उत्पत्त्या द्विप्रकार-मपि सर्वम् औदारिकम् अवसेयम् ।

वैक्रियस्योत्पत्तिप्रकारं प्ररूपयति—

औपपादिकं वैक्रियम् ॥ ४२ ॥

उपपादेन भवम्–औपपादिकम्–तत्सर्वं वैक्रियं विज्ञेयम् । तच्च देवानाम्, नारकाणां च । स्वामित्वमन्तरा संमूर्छनज–औपपादिकयोर्विशेषो नास्माभिरवगत इति ।

वैक्रियस्य अन्यमपि उत्पत्तिप्रकारं प्राह—

लब्धिप्रत्ययं च ॥ ४३ ॥

तदेतद् उपरि निर्दिष्टं वैक्रियं लब्धिप्रत्ययमपि संभवति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लब्धिश्च तपोविशेषात् प्राप्तः शक्तिविशेषः, सा एव प्रत्ययः कारणं यस्य तत् । एतच्च लब्धिप्रत्ययं भावसाध्वादीनां संभवति । 'औपपादिकं वैक्रियं लब्धिप्रत्ययं च' इति एकयोगेनाऽपि सिद्धे पृथक्सूत्रमिदम् उत्तरार्थमिति ।

अतः—

तैजसमपि ॥ ४४ ।

वैक्रियवद् एतत् तैजसमपि केषाञ्चित् सुतपस्विनां लब्धिप्रत्ययमपि संभवति ।

स्वरूप-स्वामिनिर्धारणपूर्वकम् आहारकमुल्लिखति—

शुभं विशुद्धम् अव्याघाति च आहारकं
प्रमत्तसंयतस्यैव ॥ ४५ ॥

शुभं-शुभद्रव्योपाचितम्, विशुद्धं-निर्मलद्रव्योपचितम्, निरवद्यम् इति यावत्, अप्रतिघाति-व्याघातरहितम्, व्याघातश्च पूर्वोक्तस्वरूपः। स्वामी चास्य प्रमत्तः संयमी। अप्रमत्तानां महानुभावानां विसदृशेदृशचेष्टाया विरहात् । प्रयोजनं चास्य कस्मिंश्चिदर्थे संदिहानो निश्चयाधिगमार्थं क्षेत्रान्तरितस्य भगवतः समीपे औदारिकेण अशक्यगमनं मत्वा लब्धिप्रत्ययमेव आहारकं उत्पादयति, छिन्नसंशयश्च भगवन्तं दृष्ट्वा पुनरागत्य तद् विसृजति। यदा आहारकशरीरं निर्वर्तयितुमारभते तदा प्रमत्तो भवति इति एतत् 'प्रमत्तस्य' उच्यते । लब्धिप्रत्ययत्वेन विक्रियारूपत्वेन च एतदपि वैक्रिये समन्तर्भावयितुमुचितम् तथापि स्वामिप्रयोजनयोर्विशेषतावैशद्याय एतत् पृथक् सूत्रितमिति शरीराणि ।

अथ आत्मन एव उपग्राहकान् उपघातकांश्च नामतः स्वरूपतश्च दर्शयति—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदस्ति जडं तत् सर्वम् उपग्राहि, उपघाति च ॥ ४६ ॥

यावद् आत्मा परिस्पन्दते नात्यन्तं विभावरहितो भवेत् तावदेव पुद्गलाऽपुद्गलरूपं जडं वस्तु आत्मनः उपग्राहि, उपघाति च भवति। यथा हि विषशस्त्रादिकमपि विवेकपूर्वकं व्यापारयतो जनस्य उपगृह्णाति–तदेव च निर्विवेकेन व्यापारयतो घातयति–तथैव एतदपि जडं वस्तु उपग्रहोपघातपरतया समवगन्तव्यम्।

मूर्ताऽमूर्तं जडम् ॥ ४७ ॥

जडमपि वस्तुचक्रम् मूर्ताऽमूर्तत्वेन द्विधा नेयम्, आकाशादिरूपं जडम्, अमूर्तम्—तच्च प्रतीतम् तदितरत् तु मूर्तम् धर्माधर्मपुद्गलरूपम्।

गतिदाता धर्मः ॥ ४८ ॥

परिस्पन्दिनो हि आत्मनो गतिदाता ऊर्ध्वम् ऊर्ध्वम्–विकाशं प्रापयिता धर्मः–स च अहिंसादिलक्षणः तथा च भगवतीसूत्रम्–" धम्मत्थिकायस्स णं भंते। केवइया अभिवयणा पण्णत्ता? गोयमा! अणेगा अभिवयणा पण्णत्ता, तं जहा–धम्मे ति वा, धम्मत्थिकाए इ वा, पाणाइवायवेरमणे ति वा, मुसावायवेरमणे ति वा एवं जाव परिग्गहवेरमणे, कोहविविगे जाव ×मणगुत्ती ति वा, वइगुत्ती ति वा, कायगुत्ती ति वा–जे याऽवाऽन्ने तहप्पगारा सव्वे ते धम्मत्थिकायस्स अभिवयणा." (शतक २०, उद्देशक द्वितीय) यथा च गतिं विना क्वचित् कुहरगतमुदकं परिशटद् अपेयं भवति, तथैवाऽयं परिस्पन्दमान आत्मा गतिं–अहिंसादिप्राप्ति–लक्षणविकासं विना परिशटमानः–अभव्यः–स्वरूपप्राप्तौ अयोग्यो भवति इति। यस्तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'चलणसहावो धम्मो' इत्यादिशास्त्रेण प्रसिद्धः अमूर्तरूपो धर्मास्तिकायनामा पदार्थः–जीव–जडगतौ अपेक्षाकारणत्वेन जैनदर्शने एव स्वीकृतः–सोऽपि अत्र सूत्रे तन्त्रतया विवक्षितः–अप्रधानभावेन–इति ।

आक्षेपः—

ननु त्वया नवीनेन अर्वाग्दृशा स प्रसिद्धो धर्मास्तिकायः —अत्र सूत्रे अप्रधानभावेन एव केवलं भिन्नव्याख्यासंग्रहदर्शनाय एव उल्लिखितः–न च स एव प्रधानभावेन अत्र निर्दिष्टः, तदियं कीदृशी स्वमनीषिका ?

परिहारः—

न चेयं स्वमनीषिका, किन्तु आगमपूर्वकम्, शिष्टानामुक्तिपूर्वकं चैतद् निर्दिष्टम्–उपर्युक्त–श्रीभगवतीसूत्रस्थपाठ एव अत्र निर्दिष्टं मम नवीनमपि व्याख्यानं दृढयति–इति न एतस्य व्याख्यानस्य आगमपूर्वकत्वे कोऽपि शङ्काकणः किञ्च, भगवान् सिद्धसेनोऽपि स्वीयवचनेन एतदेव व्याख्यानं समर्थयति.

तथा च तद्वचनम्—

"प्रयोग–विस्रसाकर्म–तदभावस्थितिस्तथा ।
लोकानुभाववृत्तान्तः किं धर्माधर्मयोः फलम् ॥ २४ ॥
निश्चयद्वात्रिंशिका—१९.

ईदृशावेव आक्षेप–परिहारौ वक्ष्यमाणे अधर्मसूत्रेऽपि समवबोध्यौ.

गतिप्रतिषेधी अधर्मः ॥ ४९ ॥

अधर्मो हि आत्मनो विकासरूपां गतिं प्रतिषेधति, ततश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मा नाऽनन्तकालेनाऽपि स्वरूपावस्थितो भवेत् स च अधर्मो हिंसादिलक्षणः तथा च भगवतीसूत्रम्—

"अहम्मत्थिकायस्स णं भंते! केवइया अभिवयणा पण्णत्ता? गोयमा! अणेगा अभिवयणा पण्णत्ता, तं जहा–अधम्मे ति वा, अधम्मत्थिकाए ति वा, पाणातिपाते ति वा जाव मिच्छादंसणसल्ले ति वा, ××× मणअगुत्ती ति वा, वइअगुत्ती ति वा, कायअगुत्ती ति वा. जे याऽवऽन्ने तहप्पगारा सव्वे ते अहम्मत्थिकायस्स अभिवयणा" (शतक २०, उद्देशक द्वितीय) यद्यपि एतौ धर्माऽधर्मौ आत्मनो विभावशील-परिस्पन्दरूपत्वेन न केनाऽपि मूर्तौ समवलोकितौ, तथापि तयोर्यदा द्रव्यधर्माऽधर्मता विवक्ष्यते तदा कर्मपरमाणुचयरूप-त्वेन तयोर्मूर्तता सुस्पष्टतरैव।

पूरण–गलनरूपं पुद्गलम् ॥ ५० ॥

तच्च अनेकधा—

"स्पर्श-रस-गन्ध-वर्णाः शब्दो बन्धश्च सूक्ष्मता स्थौल्यम्।
संस्थानं भेद-तम-श्छाया-उद्द्योताऽऽतपश्चेति ॥ २१६ ॥
"कर्म-शरीर-मनो-वाग्विचेष्टितो–च्छ्वास–दुःख-सुखदाः स्युः।
जीवितमरणोपग्रहकराश्च संसारिणः स्कन्धाः" ॥ २१७ ॥
(प्रशमरतौ)

अर्थात्—स्पर्शपुद्गलाः, रसपुद्गलाः, गन्धपुद्गलाः, वर्ण-पुद्गलाः, शब्दपुद्गलाः, तमःपुद्गलाः, छायापुद्गलाः, उद्द्योत-पुद्गलाः, आतपपुद्गलाः, कर्मपुद्गलाः, शरीरपुद्गलाः, मनःपु-द्गलाः, वाक्पुद्गलाः, उच्छ्वासनिःश्वासपुद्गलाः–एवमनेकधा पुद्गला ज्ञेया इति स्पष्टमेतत्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विभावुकस्य आत्मनः परिस्पन्द आस्रवः ॥ ५१ ॥

यद्यपि अयम् आस्रववाच्यार्थः पूर्वोक्तयोर्धर्माऽधर्मयोरन्तर्भवति, तथापि श्रीजिनशासने आश्रवशब्दस्य सविशेषं प्रसिद्धत्वेनैव तस्याऽत्र पृथग् व्याख्या। शुभश्चेदयम् आत्मानम् उपगृह्णाति, अयमेव अशुभो विघातयति आत्मविकासम् इति।

शुभाऽशुभानाम् आश्रवाणां निरोधरूपो य आत्मनः परिस्पन्दः—स स्वरूपावस्थाननिमित्तत्वेन आत्मानम् उपगृह्णात्येव स च—

तन्निरोधः स्वरूपावस्थानसहायी संवरः ॥ ५२ ॥

एतौ आश्रव–संवरौ आत्मपरतन्त्रौ, आत्मा सकर्मकत्वेन नैकप्रकारः, अत एव एतयोरपि नानात्वं स्वयमेव नेतव्यमिति आत्मनः उपग्राहक–उपघातकाः।

स्वरूपावस्थानरूपं मोक्षतत्त्वं ससाधनम् आत्मकाण्डे एव प्रमण्डितम्, ततो नात्र विव्रियते

इति—आत्मकाण्डम्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकीर्णकाण्डम्

पूर्वं तावत् मध्यस्थया दृशा, नवीनया च दिशा व्याख्यातमपि सर्वं सम्प्रदायदृष्ट्या व्याख्यातुकामो ग्रन्थकारः अस्मिन् प्रकीर्णकाण्डे उपयोग–उपयोगभेद–प्रमाण–प्रमाणभेद–आस्रवादिमोक्षान्तं पुनरपि प्ररूपयति ।—

चेतनात्मक उपयोगः । १ ।

चितिः–चेतना–चिच्छक्तिरिति यावत् तदेव स्वरूपम्–उपयोगस्य इति ।

चेतनात्मकत्वम् उपयोगसामान्यलक्षणं प्ररूप्य तदवान्तरभेदान् प्रदर्शयितुमुपक्रमते—

स त्रिविधः ज्ञाना–ऽज्ञान–दर्शनभेदात् । २ ।

स उपयोगः त्रिविधः–त्रिप्रकार इति यावत् ।

तत् त्रैविध्यमेव क्रमशः संलक्षयन्नादौ तावत् ज्ञानं विवेचयति—

प्रधानविशेषम् उपसर्जनीभूतसामान्यं ज्ञानम् । ३ ।

प्रधानो मुख्यविशेष्यतया भासमानः विशेषो व्यक्त्यादिरूपः, उपसर्जनीकृतं गुणीभूतम्, सामान्यं सत्त्वादिरूपं च यत्र भाति–यथा इदं द्रव्यम् ।

अल्पज्ञधीवृद्धये ज्ञानीयप्रपञ्चं स्यान्मात्रं विशदयति–ज्ञानं विषयि, अर्था विषयाः, तयोः परस्परं स्याद्वादसिद्धोऽध्यवसेयाऽध्यवसायिभावलक्षणः संबन्धः । अत्र ज्ञानीया ध्यवसेयता–त्रिविधा–विशेष्यताख्या, प्रकारताख्या, संसर्गताख्या च । तथा च 'इदम् द्रव्यम्' इत्यादौ इदंत्वावच्छिन्नविशेष्यतानिरूपित-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रव्यत्वावच्छिन्नप्रकारताशालि-अभेदसंसर्गकं ज्ञानं भवतीति-दिक् ।

ज्ञानस्य किंचित्स्वरूपं प्रदर्श्य तद्भेदानाह—

तत् मति-श्रुता-ऽवधि-मनःपर्याय-केवलभेदात् पञ्चविधम् ॥ ४ ॥

स्पष्टम् ।

दर्शितपञ्चभिदायामाद्यं मतिज्ञानं लक्षयति—

उत्पन्नाऽविनष्टपदार्थग्राहकं सत् सांप्रतकाल-विषयताशालि मतिज्ञानम् ॥ ५ ॥

त्रिकालविषयके श्रुतादावतिप्रसंगवारणाय सत्पदान्तं विशेषणम् । तदुपादाने च श्रुतादेः उत्पन्नविनष्टाऽनुत्पन्नाद्यर्थस्यापि ग्राहकत्वेन उत्पाद्याऽविनश्यत्पदार्थमात्रग्राहकार्थकसत्पदान्तघटितमतिज्ञानलक्षणस्य नातिप्रसंगः । कालविशेषनियामकतया विशेष्यमपि सफलम्. तदपि सांप्रतकालमात्रार्थकम्-तेन केवलादिव्युदासः । मतेरर्थस्तु-' इन्द्रियमनोभ्यां यथास्वं अर्था मन्यन्तेऽनया ' इति मतिः ।

अथ मतिज्ञानलाभे किं निमित्तम् ? इत्याह—

तद् इन्द्रियाऽनिन्द्रियनिमित्तम् ॥ ६ ॥

तद् मतिज्ञानम्-इन्द्रियं चक्षुरादि, अनिन्द्रियं मनः एतदुभयनिमित्तम्-उभयकारणकमित्यर्थः ।

अथ कथं पुनरिन्द्रियप्रतिषेधेन इन्द्रियलिंग एव मनसि अनिन्द्रियशब्दस्य प्रवृत्तिः ? इति चेत् , ईषदर्थस्य नञः प्रयोगादिति गृहाण, ईषदिन्द्रियमनिन्द्रियमिति, यथा अनुदरा कन्येति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद् एतद् मतिज्ञानमुभयनिमित्तमप्येकशश्चतुर्विधम्, तदाह—

पुनस्तद् अवग्रहेहाऽवायधारणाभेदाच्चतुर्विधम् ॥ ७ ॥

यथा स्वमिन्द्रियैर्विषयाणामालोचनमवग्रहः, अवगृहीतस्य निश्चयविशेषजिज्ञासा ईहा, ईहितस्य निश्चयकरणमपायः, अवाप इति वा, निश्चयितस्य मत्यवस्थानमवधारणा, अवग्रहादीनां विशेष स्वरूपं नन्दी—विशेषावश्यकादिभ्यो ग्रन्थान्तरेभ्योऽवसेयम्, विस्तरभयान्नात्र मीमांस्यते ।

चतुर्णाम् मध्ये कत्यर्थस्य ग्राहकाः ? इत्याशङ्कायामाह—

चत्वारोऽप्येतेऽर्थस्य ॥ ८ ॥

अवग्रहादयो मतिज्ञानविकल्पा अर्थस्य भवन्तीत्यर्थः।

ननु किमवग्रहादयः सर्वस्येन्द्रियानिन्द्रियस्य भवन्ति ? उत कश्चिद् विषयविशेषोऽस्ति ? इत्यत आह—

व्यञ्जनस्यावग्रह एव ॥ ९ ॥

व्यञ्जनमव्यक्तं शब्दादिजातम्—तस्य अवग्रहो भवति । यद्यपि सूत्रस्य एवकारं विनैव नियमार्थकता प्रतिपादिता स्यादेव, तथापि स्पष्टता प्रयोजनकमेवेह तस्योपादानं ज्ञातव्यम् ।

सर्वेन्द्रियाणामविशेषेण व्यञ्जनावग्रहप्रसङ्गे यत्राऽसंभवः, तदर्थं प्रतिषेधयन्नाह—

चक्षुरनिन्द्रियभिन्नैस्तद्ग्रहः ॥ १० ॥

चक्षुर्मनोभ्यां व्यञ्जनावग्रहो न भवति, तयोरप्राप्यकारित्वात् शेषैश्चतुर्भिरिन्द्रियैर्भवतीति भावः ।

दर्शितज्ञानपञ्चके द्वितीयं श्रुतज्ञानं दर्शयन्नाह—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिकालविषयकं सत् उत्पन्न–विनष्टाऽनुत्पन्नार्थग्राहकतायुतं श्रुतज्ञानम् ॥ ११ ॥

यथोक्तलक्षणविशिष्टकेवलादावतिप्रसक्तिवारणाय श्रुतत्वविशिष्टत्वेन विशेषणीयम् । विशेषण–विशेष्ययोर्वस्तुस्थितिप्रदर्शनमात्रपरत्वमवसेयम् ।

श्रुतमाप्तवचनम् ॥ १२ ॥

श्रुतम् आगमज्ञानम् आप्तवचनम्, आप्तस्य रागद्वेषरहितत्वेन जिनवचनमपि आप्तवचनम्। जिनश्च अलौकिकः आप्तः, लौकिकस्तु माता–पितृ–गुरु–वृद्धरूपः । इदमपि लक्षणं सुवचम् ।

लक्षणतो निर्दिष्टं श्रुतज्ञानमिदानीं विकल्पतो दर्शयन्नाह–

तन्मतिपूर्वं द्व्यऽनेकद्वादशभेदम् ॥ १३ ॥

तत् श्रुतज्ञानं मतिपूर्वं मतिकारणकमित्यर्थः । द्विभेदम्, अनेकभेदम्, द्वादशभेदं च । द्विभेदं तावत् अङ्गबाह्यम्, अङ्गप्रविष्टं च । अङ्गबाह्यम् अनेकविधम्, दशवैकालिकोत्तराध्ययनादि, अङ्गप्रविष्टं द्वादशविधम्, आचाराङ्गादि–दृष्टिवादपर्यन्तम् । यद्यपि द्विभेदाऽवान्तरभेदयोरनेक–द्वादशपदयोस्सूत्रे उपादानं व्यर्थमिव आभाति, तथापि अङ्गबाह्या–ऽङ्गप्रविष्टरूपमूलभेदोपपादकतयैव तस्य साफल्यम् इति सूक्ष्मदशः । सर्व एव सुशीलः सर्वश्रुतपाठाधिकारी ।

तार्तीयीकमवधिज्ञानं निरूपयति—

अवाग्धानादवच्छिन्नविषयत्वाद्वा अवधिः ॥ १४ ॥

इदं व्युत्पत्तिमात्रेण कृतमस्ति तल्लक्षणं तु —

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधोविषयकबहुतरवस्तुग्रहणशीलम् अवधिज्ञानम् ॥ १५ ॥

केवलं विषयग्राहकत्वस्य उपादाने इतरत्रातिप्रसक्तिः। अतो बहुतरान्तम्। वस्तुतस्तु अवधिज्ञानेन उपरि अधस्ताच्च ज्ञायते, परन्तु देवाः खलु अवधिज्ञानेन सप्तमनरकपर्यन्तमधः पश्यन्ति जानते, स्तोकमूर्ध्वं पश्यन्ति स्वविमानध्वजदण्डपर्यन्तमेव इति रहस्यं हृदि निधाय सूत्रोक्तं तथालक्षणं प्राणायि सूत्रकृता। स पुनः द्विविधः भवप्रत्ययः, गुणप्रत्ययश्च। आद्यो देवानां नारकाणां च। द्वितीयस्तु षड्विकल्पात्मकः मनुष्यतिरश्चामिति।

अथ क्रमप्राप्तं मनःपर्यायज्ञानं निरूपयति—

परकीयमनोगतार्थपरिगमकं मनःपर्यायज्ञानम् ॥१६॥

परिगमकत्वं बोधकत्वम्, तत् तावन्मात्रं तु पूर्ववदितरत्रातिप्रसक्तमतोऽर्थान्तम्। विशेषणमात्रोपादाने परकीयमनोविषयादावतिप्रसङ्गः, तन्निवारणाय च विशेष्यम्।

अथ तद्द्वैविध्यं प्ररूपयति—

तद् ऋजुमति–विपुलमति-भेदात् द्विविधम् ॥ १७ ॥

तत् मनःपर्यायज्ञानम् ऋज्वी मतिर्यस्य तत् ऋजुमति, तथा विपुला मतिर्यस्य तत् विपुलमति-द्विविधं–द्विप्रकारम्।

उक्तयोरनयोः पुनरपि विशेषप्रतिपत्त्यर्थमाह—

विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ॥ १८ ॥

तदावरणक्षयोपशमे सति आत्मनः प्रसादो विशुद्धिः। प्रतिपतनं प्रतिपातः, न प्रतिपातः–अप्रतिपातः, ताभ्यां तयोर्विशेषः। अर्थात् विपुलमतिकं मनःपर्यायज्ञानं विशुद्धम्, अप्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिपतनशीलं च। ऋजुमतिकं तु तत् न तथा। इति ऋजुमति-विपुलमत्योर्विशेष इत्यर्थः।

क्रमागतं पञ्चमं केवलज्ञानं लक्षयति—

साक्षात् सकलज्ञेयविषयकं केवलज्ञानम् ॥ १९ ॥

ज्ञेयत्वं ज्ञेयविषयता, तद्विषयकत्वं तद्विशिष्टत्वम्। सकलज्ञेयविषयकत्वं तु श्रुतज्ञानेऽप्यस्ति. अत उक्तम् 'साक्षात्' इति। एतच्च आत्मनः क्षायिकलब्धिरूपम्।

एवं ज्ञानपञ्चकं लक्षण-स्वरूपाभ्यां प्ररूप्य तेषां पुनर्विषयप्रदर्शयन्नाह—

मति-श्रुतयोर्निबन्धः सर्वद्रव्येष्वसर्वपर्यायेषु ॥ २० ॥

पूर्वोक्तयोर्मतिश्रुतज्ञानयोर्निबन्धः-संबन्धः क्व ? इत्याशङ्कायामाह-सर्वद्रव्येषु-जीवादिषु. पुनः कथंभूतेषु ? असर्वपर्यायेषु. अत्रायं भावः-ताभ्यां हि आत्मा सर्वद्रव्याणि जानीते. न तु सर्वपर्यायानिति।

तदनन्तरमवधेर्विषयं निदर्शयन्नाह—

रूपिष्ववधेः ॥ २१ ॥

विषयनिबन्ध इत्यनुसज्यते। 'रूपिषु' इत्यनेन पुद्गलाः, पुद्गलद्रव्यसम्बद्धाश्च जीवाः परिगृह्यन्ते, रूपिष्वेवावधेर्विषयनिबन्धो, नाऽरूपिष्विति नियम्यते, स चावधिनिबन्धो रूपिष्वपि भवन् न सर्वपर्यायेषु, किंतु स्वयोग्येष्वेवेत्यवधारणार्थम् 'असर्वपर्यायेषु' इत्यभिसंबध्यते।

तदनन्तरं मनःपर्यायज्ञानस्य को विषयनिबंधः ? इत्यत आह—.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदनन्तभागे मनःपर्यायस्य ॥ २२ ॥

यदेतद् रूपिद्रव्यं सर्वमवधिज्ञानविषयत्वेन समर्थितं–तस्यानन्तभागीकृतस्यैकस्मिन् भागे मनःपर्यायः प्रवर्तते. ।

अथ चरमतयोपन्यस्तस्य केवलज्ञानस्य विषयनिबंधनायाह—

सर्वद्रव्यपर्यायेषु केवलस्य ॥ २३ ॥

सर्वद्रव्येषु, सर्वपर्यायेषु च केवलस्य विषयनिबंधो भवति । तद्धि सर्वभावग्राहकं संभिन्नलोकालोकविषयम्–नातः परं ज्ञानमस्ति, न चास्ति तद् ज्ञेयं यन्नावभासते केवलेन–इति । केवलं परिपूर्णं शुद्धमनिरपेक्षम्–इत्याद्यपरिमितमाहात्म्यं तस्य ।

अत्र विषयनिबन्धोऽवधृतो मत्यादीनाम् इदं तु न निर्ज्ञातं यद् एकस्मिन्नात्मनि स्वनिमित्तसन्निधानोपजनितवृत्तीनि कति ज्ञानानि भवन्ति ? इत्यत उच्यते—

एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ २४ ॥

एकः आदिर्येषां तानि तथा, भाज्यानि विभक्तव्यानि, यौगपद्येनैकस्मिन्नात्मनि कुतः ? आ चतुर्भ्यः–तद्यथा–एकं केवलज्ञानं, द्वे मतिश्रुते, त्रीणि मति–श्रुताऽवधिज्ञानानि, मति–श्रुत–मनःपर्यायज्ञानानि वा; चत्वारि मति–श्रुताऽवधि–मनःपर्यायज्ञानानि, न पञ्च संति–केवलस्यासहायत्वात् ।

एवं मत्यादिज्ञानपञ्चकं निरूप्य स्वपरव्यवसायित्वाज्ज्ञानस्यैव प्रमाणत्वं प्रख्यापयन् तत्संख्याप्रदर्शनपुरःसरं प्रतिपादयन्नाह—

तत् प्रमाणे ॥ २५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'तत्' वचनं मत्यादिज्ञानपरिग्रहार्थम् प्रमिणोति, प्रमीयतेऽनेन, प्रमितिमात्रं वा प्रमाणम् । वक्ष्यमाणभेदापेक्षया द्विवचननिर्देशः, तल्लक्षणं तु स्वपरव्यवसायित्वम् ।

उक्तस्य पञ्चविधस्य ज्ञानस्य प्रमाणद्वयान्तःपातित्वे प्रतिपादिते, ते च के द्वे प्रमाणे ? इति परिगणयन् आह—

आद्ये परोक्षम् ॥ २६ ॥

अत्र आदौ भवमाद्यम्, इति चेत् कथं द्वयोरेव प्रथमत्वम् ? मुख्योपचारपरिकल्पनया मतिज्ञानं तावद्वस्तुतो मुख्यत्वात् प्रथमम्, श्रुतमपि तत्प्रत्यासत्त्या प्रथममित्युपचर्यते । द्विवचननिर्देशसामर्थ्याद्गौणस्यापि ग्रहणम् । आद्यं च आद्यं च आद्ये मतिश्रुते इत्यर्थः, तदुभयमपि परोक्षं प्रमाणमित्यभिसंबध्यते, कुतोऽस्य परोक्षत्वम् ? परायत्तत्वात् ।

अभिहितलक्षणात् परोक्षादितरस्य सर्वस्य प्रत्यक्षत्वप्रतिपादनार्थमाह —

प्रत्यक्षमन्यत् ॥ २७ ॥

प्रत्यक्षम्—उक्तविपरीतं प्रत्यक्षपदवाच्यं प्रमाणम् अन्यत् अवध्यादित्रितयं. कुतोऽस्य प्रत्यक्षत्वम् ? अतीन्द्रियत्वात्, स्वायत्तत्वाच्च इति ।

अथैतत्परोक्षं प्रकारतः प्रकटयति—

स्मरण–प्रत्यभिज्ञान–तर्काऽनुमानाऽऽगमभेदतस्तत् पञ्चप्रकारम् ॥ २८ ॥

स्मरणादिकं क्रमशः लक्षयति—

संस्कारप्रबोधसंभूतत्वे सति, अनुभूतार्थविषयकत्वं स्मृति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वं, यथा तत् तीर्थकरबिम्बमिति, अनुभव–स्मृतिहेतुकत्वे सति सामान्यादिगोचरसंकलनात्मकज्ञानत्वं प्रत्यभिज्ञानत्वं, यथा स एवायं जिनदत्त इत्यादि, उपलम्भानुपलम्भहेतुकं नित्य-साध्य–साधनसंबन्धविषयकं परस्परं सापेक्षसंवेदनं तर्कः, यथा यावान् कश्चिद् धूमः स सर्वोऽपि वह्नौ सत्येव भवति नान्यथा।

अथानुमानं द्विप्रकारम् स्वार्थं परार्थं चेति. तत्र स्वार्थानुमानं तावत् प्रदर्शयति—

हेतुग्रहण–संबंधस्मरण–कारणकत्वे सति साध्यविज्ञानशालि स्वार्थानुमानम् ॥ २६ ॥

तत्र को नाम हेतुः ? निश्चितान्यथानुपपत्त्येकलक्षणो हि हेतुः ।

किं तावत् साध्यम् ? अभीप्सितं साध्यम् इति.

को हि सम्बन्धः ? अविनाभावो नाम सम्बन्धः ।

अथ परार्थानुमानं प्ररूपयति—पक्ष–हेतु–वचनात्मकं परार्थानुमानम्.

पक्षापरपर्यायः साध्यविशिष्टो धर्मी ।

व्युत्पन्नमतिप्रतिपाद्याभिप्रायेणैतल्लक्षणमिति संक्षेपतः सद्धेतुं निरूप्येदानीं हेत्वाभासान्निरूपयति–असिद्ध–विरुद्धाऽनैकान्तिकास्त्रयो हेत्वाभासा इति । को नाम हेत्वाभासः ? अनुमिति–तत्करणान्यतरविरोधको हि हेत्वाभासः ।

तत्रासिद्धमभिदधति–यस्यान्यथानुत्पत्तिः प्रमाणेन न प्रतीयते सोऽसिद्ध इति । यथा–परिणामी शब्दः चाक्षुषत्वादिवि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ विरुद्धं लक्षयति-साध्यविपर्ययेणैव यस्यान्यथानुपपत्तिरध्यवसीयते स विरुद्ध इति । यथा तुरंगोऽयं शृङ्गसंगित्वादिति ।

तृतीयमनैकान्तिकं प्रदर्शयति-यस्यान्यथानुपपत्तिः संदिह्यते स अनैकान्तिक इति-यथा पर्वतोऽग्निमान् प्रमेयत्वादिति इति हेत्वाभासाः ॥

अथ क्रमप्राप्तं पञ्चमभेदरूपमागमं निरूपयति-आप्तवचनादाविर्भूतमर्थसंवेदनमागम इति. यथा समस्त्यत्र प्रदेशे रत्ननिधानमिति ।

प्रसङ्गतोऽत्र बहुवक्तव्यमस्ति परं ग्रन्थगौरवभयान्न वितन्यते इति ।

एवं ज्ञानं निरूप्याऽज्ञानं निरूपयति—

सदसतोरविशेषाद्यदृच्छोपलब्ध्यात्मकमज्ञानम् ॥३०॥

सत् विद्यमानम्, असत् अविद्यमानम्-तयोरविशेषेण-विशेषाभावेन यदृच्छया स्वैरवृत्त्या उपलब्धिः-साक्षात्कारः, तदात्मकमित्यर्थः । यावच्च देहाध्यासस्तावत् सर्वस्याऽपि प्राणिनो व्यवहारतो ज्ञानमपि एतत्सूत्रोक्तम् अज्ञानम् । तत् पुनस्त्रिविधम्-मति-श्रुत-विभङ्गभेदात् ।

उपयोगावान्तरभेदरूपं तार्तीयिकं दर्शनं निरूपयति—

सामान्यप्रधानमुपसर्जनीकृतविशेषार्थग्राहकं दर्शनम् ॥३१॥

अत्र निखिलं पदकृत्यं केवल विशेष्य-विशेषणभावव्यत्यासेन ज्ञानलक्षणोक्तदिशाऽवसेयमिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथावद्वस्तुनिरूपणप्रवणं सप्रपञ्चं प्रमाणं संक्षेपतः निरूप्य तदेकदेशग्राहितया नयान्निरूपयति—

नैगम-संग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढ-एवंभूता नयाः ॥ ३२ ॥

तल्लक्षणं तु प्रमाणसंगृहीतार्थैकांशबोधकत्वम् । नीयते—प्राप्यते येन श्रुताख्यप्रमाणविषयीकृतस्य पदार्थस्यांशस्तदितरांशौदासिन्यतः स प्रतिपत्तुरभिप्रायविशेषो नय इति निर्गलितार्थः ।

स प्रधानतो द्वेधा—द्रव्यार्थिकः, पर्यायार्थिकश्चेति । द्रव्यं सामान्यम्—उत्सर्गः—अनुवृत्तिरित्यर्थः, तद्विषयो द्रव्यार्थिकः । पर्यायो—विशेषः—अपवादः—व्यावृत्तिरित्यर्थः, तद्विषयः पर्यायार्थिकः ।

तयोर्भेदाः नैगमादयः सप्त, तत्र द्रव्यार्थिकनयस्य त्रयो भेदाः—नैगम—संग्रह—व्यवहाराख्याः । पर्यायार्थिकस्य चत्वारो भेदाः—ऋजुसूत्र—शब्द—समभिरूढ—एवंभूतस्वरूपाः ।

अत्र संक्षेपतस्तल्लक्षणान्युच्यन्ते ।

निगमेषु येऽभिहिताः शब्दास्तेषामर्थः, शब्दार्थपरिज्ञानं च, तद्रूप एव देश—समग्रग्राही नैगमः ।

अर्थानां सर्वैकदेशसंग्रहणं संग्रहः ।

लौकिकसमः उपचारप्रायो विस्तृतार्थो व्यवहारः ।

सतां सांप्रतानामर्थानामभिधानपरिज्ञानमृजुसूत्रः ।

यथार्थाभिधानं शब्दः ।

सत्स्वर्थेष्वसंक्रमस्समभिरूढः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यञ्जनार्थयोरेवंभूतः। सर्वत्र नयेषु अन्योऽन्यापेक्षाग्राहित्वमिति पूरणीयम्। अत्र विशेषतो नयविवरणं नयरहस्यादिग्रन्थेभ्योऽवगन्तव्यम्।

॥ इति जीवतत्त्वम् ॥

जडताशालिन उपयोगशून्या अजीवाः ॥ ३३ ॥

उपयोगशून्यत्वे सति जडत्ववत्त्वमजीवलक्षणम्। उपयोगशून्यत्वं नाम उपयोगात्यन्ताभाववत्त्वम्, तेन सुषुप्तिकालावच्छेदेनोपयोगध्वंस-प्रागभाववत्यपि जीवे नातिप्रसङ्गः, इति शेषं स्पष्टम्।

तत्संज्ञाभेदप्रदर्शनार्थमाह—

ते धर्मा-ऽधर्मा-ऽऽकाश-काल-पुद्गलाः पञ्च ॥ ३४ ॥

जीवद्रव्यसहिता ह्येते षड्द्रव्यपदभाजो भवन्ति. द्रव्यलक्षणं तु गुणवत्त्वं पर्य्यायवत्त्वं वेति। द्रव्यं द्रव्यान्तराद् येन विशिष्यते स गुणः। तेषां विकाराः विशेषात्मना भिद्यमाना पर्य्यायाः।

पञ्चानामजीवानां क्रमशः लक्षयितुमुपक्रमते, केवलधर्मपदेनाऽदृष्टग्रहणं मा जायतामतोऽस्तिकाययुतं प्रभूतप्रदेशरूपम् धर्मोऽस्तिकायपदवाच्यं द्रव्यं लक्षयति—

अमूर्ताऽसंख्येयप्रदेशशाली गत्युपग्रहकार्यानुमेयो धर्मास्तिकायः ॥ ३५ ॥

आत्मन्यतिवारणाय विशेष्यम्। चरणनिष्ठबलादावतिप्रसङ्गवारणाय शाल्यन्तं विशेषणम्। पूर्वोक्तहेतुकमधर्मास्तिकायाख्यं द्रव्यं निरूपयति—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अमूर्त्तोऽसंख्येयप्रदेशयुतः स्थित्युपग्रहकार्यानुमेयः अधर्मास्तिकायः ॥ ३६ ॥

विशेष्यसार्थक्यं पूर्ववदेव। युतान्तं विशेषणं तु आसनादौ समापतन्तीम् अतिप्रसक्तिं निषेधति।

क्रमप्राप्तं आकाशाख्यं द्रव्यं निरूपयति—

अमूर्तानन्तप्रदेशसहितम् अवकाशोपग्रहकार्यानुमेयमाकाशम् ॥ ३७ ॥

स्पष्टं चैतत्–अत्र दिशोऽप्याकाशेऽन्तर्भावः, आदित्योदयाऽपेक्षया आकाशप्रदेशपङ्क्तिषु 'इत इदम्' इति व्यवहारोपपत्तेरिति दिक्।

कालं निरूपयति—

वर्त्तनापरिणामः क्रियाद्युपग्रहकार्यानुमेयः कालः ॥३८॥

वर्त्तना–वृत्तिः सर्वपदार्थानां, सा कालाश्रया। परिणामो विविधः, अनादिरादिमांश्च। अरूपिष्वनादिः, रूपिष्वादिमान्. क्रिया तु त्रिविधा–प्रायोगिकी, वैश्रसिकी, मिश्रा चेति, आदिपदात् कालिकपरत्वाऽपरत्वयोरुपग्रहो ज्ञेयः।

क्रमप्राप्तं पञ्चमभेदं पुद्गलं निरूपयति—

संख्येयाऽसंख्येयाऽनन्तप्रदेशयुक्ता रूपिणः पुद्गलाः ॥ ३९ ॥

रूपं मूर्त्तिः, तदेषामऽस्ति रूपिणः मूर्तिमन्त इत्यर्थः। अथवा रूपमिति गुणविशेषवचनशब्दः, तदेषामस्ति इति ते तथा पुद्गला इति. बहुवचनं तु तद्भेदप्रतिपादनार्थम्। एते च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुद्गलाः शरीर–भाषा–मनः–प्राण–अपान–सुख–दुःख–जीवित–मरणोपकारिणः स्पष्टतयैव प्रतीताः। जीवसहितानि च एतानि षड् अपि द्रव्याणि उत्पाद–व्यय–ध्रौव्यभाञ्जि तद्भावाव्ययानि च सन्ति। जीव–धर्मा–ऽधर्मा–ऽऽकाशानि अमूर्तानि, पुद्गलास्तु मूर्त्ता इत्युक्तम्।

नन्वत्र सूत्रे रूपमात्रोपादानेन किं रसाद्यसत्त्वमिति चेन्न, तदविनाभावित्वेन रसादीनामपि यथासम्भवमुक्तप्रायत्वात्।

विशेषतश्च स्वसमयप्रसिद्धाः–अस्तित्वम्, वस्तुत्वम्, सामान्यविशेषात्मकत्वम्, प्रमेयत्वम्, अगुरुलघुत्वम्, प्रदेशत्वम्, चेतनत्वम्, अचेतनत्वम्, मूर्तत्वम्, अमूर्त्तत्वं चेति सामान्यगुणा दश, प्रत्येकमष्टावष्टौ जीवादिद्रव्याणाम्।

ज्ञान–दर्शन–सुख–वीर्य–स्पर्श–रस–गन्ध–वर्णाः, गतिहेतुत्वम्, स्थितिहेतुत्वम्, अवगाहनहेतुत्वम्, वर्तमानहेतुत्वम्, चेतनत्वम्, अचेतनत्वम्, मूर्त्तत्वम्, अमूर्त्तत्वं चेति षोडशविशेषगुणाः द्रव्याणाम्, प्रत्येकं जीव–पुद्गलयोः षट्, इतरेषां त्रयो गुणाः, अन्त्याश्चत्वारो गुणाः स्वजाति–विजातिभ्यां सामान्यविशेषरूपाश्च। यौ धर्माऽधर्मौ शुभाऽशुभफलप्रसवसमर्थौ तौ च मूर्त्तावेव पुद्गलात्मकत्वात्। अत्र च प्रकरणे पुद्गलग्रहणेन तयोर्ग्रहणमिति नास्ति तद्व्यतिरिक्तत्वाशङ्का।

ननु गगनविशेषगुणस्य शब्दस्य परिगणितगुणेषु कथमनुपादानम्? इति चेन्न, भाषावर्गणापरमाणुभिरारब्धत्वेन शब्दस्य पौद्गलिकत्वात्। प्रमाणं चात्र–'शब्दः पौद्गलिकः इन्द्रियार्थत्वात् रूपादिवदेवेति'। गगनगुणत्वं त्वसिद्धम्। तथाहि–'शब्दो न गगनगुणः अस्मदादिप्रत्यक्षत्वात् रूपादि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वत् ' इति। भगवता भर्तृहरिणापि स्वीये वाक्यपदीये शब्दस्य अणुजन्यत्वं स्वीकृतम् । नातो शब्दो गगनगुणः इति । अत्र विषये सविस्तरः पूर्वपक्षः भट्टकुमारिलकृतात् श्लोकवार्तिकात्, उत्तरपक्षश्च संमतिप्रकरणाद् अवधेयः ।

अत्र प्रसङ्गात् सामान्यं निरूपयति–सामान्यं द्विविधम्, तिर्यक्सामान्यम्, ऊर्ध्वतासामान्यं च ।

आद्यस्य लक्षणमाह—

प्रतिव्यक्तितुल्या परिणतिस्तिर्यकसामान्यम् । यथा शबलशाबलेयपिण्डेषु गोत्वमिति। द्वितीयभेदस्य लक्षणमाह–पूर्वापरपरिणामसाधारणद्रव्यमूर्ध्वता सामान्यम् । यथा कटककङ्कणानुगामि काञ्चनमिति । अथ विशेषं निरूपयति-विशेषो द्विविधः, गुणः पर्यायश्चेति । तत्र गुणाख्यविशेषं लक्षयति–सहभावी धर्मो गुणः । यथाऽऽत्मनि विज्ञानशक्त्यादिरिति । द्वितीयं पर्यायाख्यं विशेषं निरूपयति–पर्यायस्तु क्रमभावी, यथा तत्रैव सुख–दुःखादिरिति ।

अत्र सदसदंशात्मकस्य वस्तुनः सदंशात्मकभावरूपं निरूप्य असदंशात्मकभावस्वरूपं निरूपयति—

अभावश्चतुर्धा–प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावश्च ॥ ४० ॥

क्रमशश्चतुरोऽपि अभावान्निरूपयितुमाह—यन्निवृत्तावेव कार्यस्य समुत्पत्तिः सोऽस्य प्रागभावः । यथा मृत्पिण्डनिवृत्तावेव समुत्पद्यमानघटस्य मृत्पिण्डः । यदुत्पत्तौ कार्यस्याऽवश्यं विच्छेदः सोऽस्य प्रध्वंसाभावः, यथा कपालकदम्बकोत्पत्तौ नियमतो विपद्यमानस्य कलशस्य कपालकदम्बकम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः, यथा स्तम्भस्वभावात् कुम्भस्वभावव्यावृत्तिः। कालत्रयापेक्षिणी तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः। यथा चेतनाऽचेतनयोः—चेतने अचेतनात्यन्ताभावः अचेतने चेतनात्यन्ताभाव इति दिक्।

ननु 'अस्तिकायः' इति कोऽर्थः? अस्तिकायो नाम प्रभूतप्रदेशसमूहः। जीवादिषु द्रव्येषु कस्य कति प्रदेशाः? इति तु तत्तद्रव्यलक्षणे एव लक्षितामिति नेह प्रतन्यते॥

॥ इति अजीवतत्त्वम् ॥

जीवा-ऽजीवसंयोजकं तृतीयमास्रवतत्त्वं निरूपयितुं तस्य योगोपन्यासमूलत्वादादौ योगस्वरूपं प्ररूपयन्नाह—

कायवाङ्मनःकर्म योगः ॥ ४१ ॥

कोऽसावत्र योगः? इति चेच्छृणु—आत्मप्रदेशपरिस्पन्दो योगः। स च त्रिविधः—उक्तसंज्ञाभेदात्।

तत्र काययोगं लक्षयति—गमनादिक्रियाहेतुत्वे सति कायात्मपरिणामरूपत्वम्।

वाग्योगं प्रदर्शयति—उच्चारणक्रियाहेतुत्वे सति भाषायोगपुद्गलात्मप्रदेशपरिणामरूपत्वम्।

अन्तिममनोयोगं प्ररूपयति—विकल्पादिक्रियाहेतुत्वे सति मननयोग्यपुद्गलात्मप्रदेशपरिणामरूपत्वमिति।

किंच कायिकं कर्म, वाचिकं कर्म, मानसिकं कर्म इत्येष त्रिधा योगः।

अथ तन्मयमेव कायादिस्वरूपतापन्नसंसारिपुरुषसंबन्धिक्रियाकलापादभिन्नमास्रवं दर्शयन्नाह—

स आस्रवः ॥ ४२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तच्छब्देन कायादियोगपरामर्शः । कर्मणोरास्रवणादाश्रव इति व्युत्पत्त्या प्रतिपाद्यं तल्लक्षणमाह–आत्मसमवेतकृतिजन्यकर्मविषयकक्रियात्मकत्वमास्रवस्य लक्षणम् । स द्विविधः-शुभः अशुभश्च । तत्राशुभो हिंसा–स्तेयाऽब्रह्मादीनि कायिकः, सावद्यानृतपरुषपिशुनादीनि वाचिकः । अभिध्याव्यापादेर्ष्याऽसूयादीनि मानसः । अतो विपरीतः शुभः इति ।

यस्मिन् सति त्रिविधास्रवप्रवृत्तिस्तदधिकरणमनिर्धारितमतस्तद्भेदनिर्दिधारयिषयेदमाह—

अधिकरणं जीवाजीवाः ॥ ४३ ॥

अधिकरणं कस्य ? इति जिज्ञासायाम् आस्रवस्येति पूरणीयम् ।

॥ इत्यास्रवः ॥

सति द्वाररूपे तस्मिन् आश्रवे संभवो बन्धस्येत्यभिसंधाय चतुर्थतमं बन्धं निरूपयितुं हेतुनिर्देशपुरःसरं लक्षणमाह—

मिथ्यादर्शनादिजन्यकर्मवर्गणायोग्यस्कन्धा-ऽऽत्मप्रदेशयोरन्योन्याऽनुगतिमत्त्वं बन्धः ॥ ४४ ॥

आदिपदादविरतिप्रमादकषाययोगानां परिग्रहः । मिथ्यादर्शनं नाम देहाध्यासरूपम्, अविरतिस्तु हिंसादिष्वनिवृत्तिरूपा, प्रमादः पुनः कुशलेष्वनादरः कषायस्तावत् क्रोध–मान–माया–लोभाख्याः, योगाः पूर्वोक्तकायादिविकल्पाः, ।

ननु बन्धः किमेकरूपः? उतानेकरूपः? इत्यत आह—

प्रकृति–स्थित्यऽनुभावप्रदेशास्तद्विधयः ॥ ४५ ॥

स्वभावादप्रच्युतिः स्थितिः–यथा महिष्यादिक्षीराणां मधुरत्वम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकृतिः स्वभावः यथा निम्बस्य तिक्तता।

यावत्कालं तद्रसविशेषोऽनुभावः, यथा अजागोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन रसविशेषः।

इयत्तावधारणं प्रदेशः। विधिशब्दः प्रकारवाचकः, अत्र विशेषस्वरूपं तु 'कम्मपयडी' आदिग्रन्थेभ्योऽवसेयम्।

॥ इति बन्धः ॥

पूर्वकर्मावयवप्रदेशनिवारकं क्रमप्राप्तं संवरं दर्शयति—

आस्रवनिरोधः संवरः ॥ ४६ ॥

अभिनवकर्मोपादानहेतुरास्रवः पूर्वं व्याख्यातः, तन्निरोधो नाम प्रतिबन्धः, स च संवरः, तल्लक्षणं निरूपयति—

आत्मनिष्ठकर्मग्रहणहेतुभूतपरिणामाभाववत्त्वम् ॥ ४७ ॥

संवृणुते इति संवरः, तदुत्पत्तिस्तु गुप्ति-समिति-धर्माऽनु-प्रेक्षा-परिषहजय-चारित्रैः, तपसा, निर्जरया च।

गुप्त्यादिनिर्वचनमाह-संसारकारणादात्मनो गोपनं गुप्तिः, प्राणिपीडापरिहारार्थं सम्यगऽयनं समितिः, इष्टस्थाने धत्ते इति धर्मः, शरीरादीनां स्वभावानुप्रेक्षणमनुप्रेक्षा, क्षुधादिवेदनोत्पत्तौ कर्मनिर्जरार्थं तत्सहनं परिषहजयः, चारित्रं प्रसिद्धमेव, तथैव तपो द्वादशप्रकारमुल्बणम्, निर्जरा तु द्विप्रकारा समनन्तरमेवोच्यते।

अथ क्रमप्राप्तां निर्जरां निरूपयति—

कर्मपरिशाटनं निर्जरा ॥ ४८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मप्रदेशानुभूतकर्मपुद्गलविनाशरूपा निर्जरा. सा द्विधा–विपाकजा, अविपाकजा च, आद्या तावच्चतुर्गतावनेक–जातिविशेषावघूर्णिते संसारमहार्णवे चिरं परिभ्रमतः आत्मनो या शुभाशुभकर्मणः परिपाककालप्राप्तस्याऽनुभवोदयावलिस्रोतोऽनुप्रविष्टस्य आरब्धफलस्य च या निवृत्तिः सा विपाकजा निर्जरा.

अन्त्या तु यत् कर्म अप्राप्तविपाककालमौपक्रमिकाक्रियाविशेषसामर्थ्यादनुदीर्णं बलादुदीर्योदयावलिं प्रवेश्य वेद्यते आम्र–पनसादिपाकवत्, साऽविपाकजा निर्जरेति ।

॥ इति निर्जरा ॥

सकलतत्त्वज्ञानफलं मोक्षं निरूपयितुमाह––

कृत्स्नकर्मक्षयो मोक्षः ॥ ४६ ॥

कृत्स्नानां–सर्वेषाम् अष्टानां कर्मणां क्षयः–नाशः स एव मोक्षः–चतुर्विधपुरुषार्थेषु मुख्यफलरूप इत्यर्थः । परमयोगिनामपि दुर्लभः--स्वस्वरूपावस्थानं त्रिकालाऽबाधितमिति यावत् ।

इति प्रकीर्णकाण्डम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ समन्वयकाण्डम्

हंहो ! किमिदं समन्वयकाण्डम्, कश्च समन्वयः ? केषां च समन्वयः ? किमर्थं चैतत् प्रतन्यते ? इति

उच्यते, शृणु सावधानतया–

" षण्णां विरोधोऽपि च दर्शनानां तथैव तेषां शतशश्च भेदाः ।
नानापथे सर्वजनः प्रवृत्तः को लोकमाराधयितुं समर्थः ॥ "

इति केनाचित् पण्डितंमन्येन आत्मविकासोपायक्षुचापरायणानामपि सर्वेषां प्राचां दर्शनानां परस्परं विरोधमुद्भाव्य व्युद्ग्राहितो लोको नाऽद्यावधि कल्याणपथं प्राप्तुम्, निरीक्षितुम्, विचारयितुम् वा क्षमः, प्रत्युत तैरेव शिवसाधकदर्शनैः परस्परं कलहायमानः–प्रायः कषायवृद्धिमेवं वितन्वानोऽधोगतिमेव प्रयाति–इति, तद्बोधनिमित्तं तेषां षण्णामपि दर्शनानां समन्वयं प्रचिकटिषुर्ग्रन्थकार इदं नवीनमेव प्रकरणं प्रकाशते––

लोकेऽपि श्रूयते, प्रत्यक्ष्यते च वैद्यशालायाम्–यत् समागतेषु अनेकेषु ज्वराक्रान्तेषु, वैद्यस्तान् सकलानपि ज्वरिणः परीक्ष्य प्रकृतिभेदेन विविधमौषधम्, विविधं पथ्यं च प्रदर्शयति. ततो न ते रोगिणः क्वापि कदाचित् परस्परम् औषधभेदेन, पथ्यभेदेन वा कलहयन्ति, वैद्याय वा शपन्ति अथवा इदमेव औषधं वरम्, इदं च न वरम् इति परस्परं विवदन्ते, अथवा गणितशालायां अनेके गणितशास्त्रिणः चतुर्विंशति–संख्यासाधने प्रवृत्ताः ' आठ तेरी चोवीश ' ' छ चोक चोवीश ' ' त्रण अट्ठां चोवीश ' ' चार छक चोवीश ' ' बार दु चोवीश ' एवम् अनेकरीत्या चतुर्विंशतिं साधयन्ति. एवं साध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यमानाश्च मात्ररीतिप्रभेदावलम्बनेनैव न कदाचिदपि विवदन्ते परम् अमन्यापयन्ति वा एवमेव महर्षीणां संनिधाने समागतेषु विविधेषु मोहज्वराक्रान्तेषु तैस्तैः महर्षिभिः तेषां मोहज्वरं परीक्ष्य दत्तानि–इमानि दर्शनानि औषधरूपाणि, तदनुष्ठानानि च पथ्यरूपाणि प्रदर्शितानि इति तत्र कः कलहः–कश्च विरोध इति ।

पुनश्च इमानि सर्वाणि दर्शनानि भावनारूपीणि–इति यस्य मुमुक्षोर्या समनुकूला भावना स तामाश्रित्य, अनुशील्य च आत्मबोधम्–भेदज्ञानम्–विवेकख्यातिं प्राप्नुयात्, न तत्र संदेहः तथाहि—

प्रकृति–पुरुषौ मन्वानाः सांख्याः–यदि एवमेव अभ्यस्यन्ति–निश्चिन्वन्ति–च–यद्–न करोत्येष किञ्चित्, एतत्तु विभावादिकं सर्वं पारिस्पन्दनं प्रकृतिव्युद्ग्राहितमेव, ततस्तेषां कथं देहभेदेऽपि विभावोत्पत्तिः, कषायवृद्धिः देहाध्यासो वा स्यात्–सांख्यदर्शनविहिततत्त्वपद्धतिमवलम्बमानस्य प्रवृत्तौ समाचरतश्च मुमुक्षोः देहाद्यध्यासाऽभावे अवश्यमेव आत्मपथप्राप्तिः—स्वरूपावस्थानं च भवेत्–इति स्वदर्शनानुकूलं समाचरन्तः सांख्याः कैरपि संख्यावद्भिः कथमाक्षेप्तुं योग्याः—

तथा च भगवान् हरिभद्रः—

" एवं प्रकृतिवादोऽपि विज्ञेयः सत्य एव हि,
कपिलोक्तत्वतश्चैव दिव्यो हि स महामुनिः " ॥ ४४ ॥

(शास्त्रवार्ता०–स्तबक तृतीय)

लोकेऽपि न हि कदापि दुग्धभोजिना शाकभोजी आक्षिप्यते, शाकभोजिना वा दुग्धभोजी आक्षिप्यते–यथाहि—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" यत्रैव यस्य शक्तिः सात्म्यं च विशेषतस्तेषाम् ॥ ४ ॥
स तमाराधयितुमलं यस्मादाराध्य चैनमाप्नोति ।
शक्त्यन्तरं ह्युपायान्तरसाधकमुत्तमं नियमात् " ॥ ५ ॥

एतां श्रीअनेकान्तजयपताकागतां श्रीहरिभद्रोक्तिमवि-स्मृत्य व्यावहारिकाः परस्परं व्यवहरन्ति, प्रवर्तन्ते च । तथैव सर्वैरपि दार्शनिकैः तदनुगामिभिश्च नैषा क्षणमपि विस्मर्तुं योग्या इति.

तैरेव भगवाद्भिः श्रीहरिभद्रैः स्वीयग्रन्थे अन्यत्राऽपि प्रोक्तम्—

" अविद्यासंगताः प्रायो विकल्पाः सर्व एव यत् ।
तद्योजनात्मकश्चैष कुतर्कः किमनेन तत् ॥ ६० ॥
जातिप्रायश्च सर्वोऽयं प्रतीतिफलबाधितः ।
हस्ती व्यापादयत्युक्तौ प्राप्ता-प्राप्तविकल्पवत् ॥ ६१ ॥
बोधरोगः शमापायः श्रद्धाभङ्गोऽभिमानकृत् ।
कुतर्कश्चेतसो व्यक्तं भावशत्रुरनेकधा ॥ ९२ ॥
कुतर्केऽभिनिवेशस्तन्न-युक्तो मुक्तिवादिनाम् ।
युक्तः पुनः श्रुते शीले समाधौ च महात्मनाम् ॥ ६३ ॥
चित्रा तु देशनैतेषां स्याद् विनेयानुगुण्यतः ।
यस्मादेते महात्मानो भवव्याधिभिषग्वराः ॥ १३२ ॥
(एतेषां सर्वज्ञानां कपिल-सुगतादीनाम्—टी०)
यस्य येन प्रकारेण बीजाधानादिसंभवः ।
सानुबन्धो भवत्येते तथा तस्य जगुस्ततः ॥ १३३ ॥
एकाऽपि देशनैतेषां यद् वा श्रोतृविभेदतः ।
अचिन्त्यपुण्यसामर्थ्यात् तथा चित्राऽवभासते ॥ १३४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथाभव्यं च सर्वेषा-मुपकारोऽस्ति तत्कृतः ।
जायतेऽवन्ध्यताऽप्येव-मस्याः सर्वत्र सुस्थिता ॥ १३५ ॥

यद्वा तत्तन्नयापेक्षा तत्कालादिनियोगतः ।
ऋषिभ्यो देशना चित्रा तन्मूलैषाऽपि तत्त्वतः ॥ १३६ ॥

तदभिप्रायमज्ञात्वा न ततोऽर्वाग्दृशां सताम् ।
युज्यते तत्प्रतिक्षेपो महानर्थकरः परः ॥ १३७ ॥

निशानाथप्रतिक्षेपो यथाऽन्धानामसंगतः ।
तद्भेदपरिकल्पश्च तथैवाऽर्वाग्दृशामयम् ॥ १३८ ॥

न युज्यते प्रतिक्षेपः सामान्यस्याऽपि तत् सताम् ।
आर्यापवादस्तु पुनर्जिह्वाच्छेदाधिको मतः ॥१३९॥

कुदृष्टथादिवद् नो सन्तो भाषन्ते प्रायशः क्वचित् ।
निश्चितं सारवच्चैव किन्तु सत्त्वार्थकृत् सदा ॥ १४० ॥

निश्चयोऽतीन्द्रियार्थस्य योगिज्ञानाद् ऋते न च ।
अतोऽप्यत्रान्धकल्पानां विवादेन न किंचन ॥ १४१ ॥

न चाऽनुमानविषय एषोऽर्थस्तत्त्वतो मतः ।
न चातो निश्चयः सम्यग् अन्यत्राऽप्याह धीधनः ॥१४२॥

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥ १४३ ॥

ज्ञायेरन् हेतुवादेन पदार्था यद्यतीन्द्रियाः ।
कालेनैतावता प्राज्ञैः कृतः स्यात्तेषु निश्चयः ॥ १४४ ॥

न चैतदेवं यत् तस्मात् शुष्कतर्कग्रहो महान् ।
मिथ्याऽभिमानहेतुत्वात् त्याज्य एव मुमुक्षुभिः ॥ १४५ ॥

ग्रहः सर्वत्र तत्त्वेन मुमुक्षूणामसंगतः ।
मुक्तौ धर्मा अपि प्रायस्त्यक्तव्या किमनेन तत् ॥ १४६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदत्र महतां वर्त्म समाश्रित्य विचक्षणैः
वर्त्तितव्यं यथान्यायं तदतिक्रमवर्जितैः ॥ १४७ ।

परपीडेह सूक्ष्माऽपि वर्जनीया प्रयत्नतः ।
तद्वत् तदुपकारेऽपि यतितव्यं सदैव हि ॥ १४८ ॥

गुरवो देवता विप्रा यतयश्च तपोधनाः ।
पूजनीया महात्मानः सुप्रयत्नेन चेतसा ॥ १४९ ॥

पापवत्स्वपि चात्यन्तं स्वकर्मनिहितेष्वलम् ।
अनुकम्पैव सत्त्वेषु न्याय्या धर्मोऽयमुत्तमः ॥ १५० ॥

—योगदृष्टिसमुच्चय पृ. ४३–४४–४५–५८–६४
(शेठ देवचंदलालभाईवाळी आवृत्ति)

अनयैव दिशा अथ नैयायिकदर्शनसमन्वयो दर्श्यते महर्षिणा हि अक्षपादेन धीमता अमूनि षोडश तत्त्वानि प्रतिष्ठापितानिः—

" तत्त्वानि षोडशाऽमुत्र प्रमाणादीनि तद्यथा,–
प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ॥ १४ ॥
दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवास्तर्क–निर्णयौ,
वादो जल्पो वितण्डा च हेत्वाभासाश्छलानि च ॥१५॥
जातयो निग्रहस्थानान्येषामेवं प्ररूपणा " ।

एषाऽपि प्ररूपणा न कथमपि विरोधबन्धगन्धमपि समुपैति. यतः–अत्र प्रमेये एव जीव–मोक्षादीनां समन्तर्भावः–अन्यानि च तत्त्वानि केवलं प्रमाणरूपवृक्षस्य शाखा–प्रशाखा–पुष्प–फल–कण्डकरूपाणि प्रमाणे एव अन्तर्भावयितुं शक्यानि अपि बालजनप्रस्फोटार्थम् अनेन दयापरेण गौतममहर्षिणा नामग्राहम्, सस्वरूपं च निर्दिष्टानि इति कथमत्र केषामपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रामाणिकानां विरोधोत्थानम्–प्रामाणिकैः प्रमाणतत्त्वे परिगृहीते एव एतानि तत्र समायान्ति–इति अवदद्भिरपि तैः तानि स्वीकृतप्रायाण्येव.

तथा "आत्म–शरीर–इन्द्रिया–ऽर्थ–बुद्धि–मनः–प्रवृत्ति–दोष–प्रेत्यभाव–फल–दुःख–अपवर्गभेदेन द्वादशविधं तत्" इति प्रमेयं प्रणिमिमानः ऋषिवरो गौतमोऽपि न जैनीं प्रमेयवादरीतिं विरोधयति केवलमत्र तयोर्भाषाभेद एव विरोधकारणं प्रतिभाति । एवं गौतमीये मोक्षस्वरूपव्याख्यानेऽपि न जैनानां विरोधलवोऽपि । तथाहि—"निरन्तरशास्त्राभ्यासात् कस्यचित् पुंसस्तत्त्वज्ञानं जायते- तेन च मिथ्याज्ञाननिवृत्तिर्विधीयते, तस्य निवृत्तौ तत्कार्यभूता रागादयो निवर्तन्ते, तदभावे तत्कार्या मनोवाक्कायप्रवृत्तिर्व्यावर्तते, तद्व्यावृत्तौ च धर्मा–ऽधर्मयोरनुत्पत्तिः × × × ततश्च सर्वसंतानोच्छेदाद् मोक्ष इति स्थितम्."

तथा—

" यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः ।
तावदात्यन्तिकी दुःखव्यावृत्तिर्न विकल्प्यते ॥
धर्माऽधर्मनिमित्तो हि संभवः सुखदुःखयोः ।
मूलभूतौ च तावेव स्तम्भौ संसार सद्मनः ॥
तदुच्छेदे च तत्कार्यशरीराद्यनुपप्लवात् ।
नात्मनः सुखदुःखे स्तः इत्यसौ मुक्त उच्यते ॥
ननु तस्यामवस्थायां कीदृगाऽऽत्माऽवशिष्यते ? ।
स्वरूपैकप्रतिष्ठानः परित्यक्तोऽखिलैर्गुणैः ॥
ऊर्मिषट्कातिगं रूपं तदस्याहुर्मनीषिणः ।
संसारबन्धनाधीनदुःखक्लेशाद्यदूषितम् ॥
(ऊर्मयः काम–क्रोध–मद–गर्व–लोभ–दम्भाः) "

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्र लक्षणे आत्मगुणशब्देन त एव तद्गुणा ग्राह्याः, ये कर्मजाः स्युः–तेषां च छेदः " कृत्स्नकर्मक्षयो मोक्षः " इति लक्षयतां जैनानामपि अभिप्रेत एव–इति गौतमोऽपि महर्षिर्न जैनदर्शनेन विरोधभावं बिभर्ति ।

तथा च परमर्षिर्हरिभद्रः—

संसारातीततत्त्वं तु परं निर्वाणसंज्ञितम् ।
तद्ध्येकमेव नियमाच्छब्दभेदेऽपि तत्त्वतः ॥ १२७ ॥

सदाशिवः परं ब्रह्म सिद्धात्मा तत् तथेति च ।
शब्दैस्तदुच्यतेऽन्वर्थादेकमेवैवमादिभिः ॥ १२८ ॥

—(योगदृष्टिसमुच्चय)

यच्च ' सृष्टिसंहारकृत् शिवः ' इति तेषां भावनं तत् तु नात्मविकासे विघ्नरूपम्, प्रत्युत केषांचित् प्राणिनां ' नाहं करोमि, नाहं संहरामि, किंतु शिव एव सकलं कलयति ' इति भावनया देहाध्यासच्छेदकम्, अत एव उपयोगिभावनारूपत्वेन तर्काऽविषयत्वेन च अन्या भावना इव सा भावनाऽपि न खण्डयितुमिष्टाऽस्माकम् ।

संवदन्ति च महर्षयो हरिभद्राः—

" ईश्वरः परमात्मैव तदुक्तव्रतसेवनात् ।
यतो मुक्तिस्ततस्तस्याः कर्त्ता स्याद् गुणभावतः ॥११॥

तदनासेवनादेव यत् संसारोऽपि तत्त्वतः ।
तेन तस्यापि कर्तृत्वं कल्प्यमानं न दुष्यति ॥१२॥

कर्त्ताऽयमिति तद्वाक्ये यतः केषांचिदादरः ।
अतस्तदानुगुण्येन तस्य कर्तृत्वदेशना ॥ १३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परमैश्वर्ययुक्तत्वाद् मत आत्मैव ईश्वरः ।
स च कर्तेति निर्दोषः कर्तृवादो व्यवस्थितः ॥ १४ ॥
शास्त्रकारा महात्मानः प्रायो वीतस्पृहा भवे ।
सत्यार्थसंप्रवृत्ताश्च कथं तेऽयुक्तभाषिणः ॥ १५ ॥
अभिप्रायस्ततस्तेषां सम्यग्मृग्यो हितैषिणा ।
न्यायशास्त्राऽविरोधेन यथाह मनुरप्यदः ॥ १६ ॥
आर्षं च धर्मशास्त्रं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥ १७ ॥

(शास्त्रवार्त्ता॰ स्तबक ३)

इति गौतममतसमन्वयः ।

अथ बौद्धदर्शनसमन्वयः ।

" सुगतः किल—
चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः ॥ ४ ॥
दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥ ५ ॥

रूपविज्ञानम्, रसविज्ञानम्, × इत्यादि × विज्ञानस्कन्धः । सुखा, दुःखा अदुःखसुखा चेति वेदनास्कन्धः । संज्ञानिमित्तोद्ग्रहणात्मकः प्रत्ययः संज्ञास्कन्धः । पुण्य–अपुण्यादिधर्मसमुदायः संस्कारस्कन्धः " (इति दुःखम्)

" समुदेति यतो लोके रागादीनां गणोऽखिलः ।
आत्माऽऽत्मीयभावाख्यः समुदयः स उदाहृतः ॥ ६ ॥
क्षणिकाः सर्वसंस्कारा इत्येवं वासना यका ।
स मार्ग इह विज्ञेयो निरोधो मोक्ष उच्यते " ॥ ७ ॥

" चित्तस्य निःक्लेशावस्थारूपो निरोधो मुक्तिर्निगद्यते "
इति षड्दर्शनसमुच्चय.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतदपि दुःख–समुदय–मार्ग–निरोधलक्षणं वैराग्यवर्धकं बौद्धमतं न कथमपि ज्ञातपुत्रशासनेन विरोधभावं बिभर्ति–इति सुविचारमेव.

किञ्च–यैरत्र बौद्धशासने अनात्मवादः समारोपितः ते तु बौद्धसंमतं आत्मशब्दवाच्यमेव न जानन्ति. यथा जैनशासने 'द्रव्यात्मा' 'कषायात्मा' इत्येतौ शब्दौ यम्–यादृशम् आत्मानं सूचयतः, तथैव तेषां बौद्धानां क्षणनश्वरपक्षगत आत्मशब्दस्तमेव भावं सूचयति. ये बौद्धाः निर्वाणवादिनः, ते न कथमपि अनात्मवादिनो भवेयुरिति, यच्च भगवतो बुद्धस्य राज्यादित्यागादिकम्, तदपि आत्मवादमेव समर्थयति–इत्येतद् बालसुगमम्, एतच्च अस्माकं कथनं मज्झिमनिकाय–

१—" छयिमानि भिक्खवे दिट्ठिट्ठानानि, कतमानि छ ? इध भिक्खवे अस्सुतवा पुथुज्जनो.... सप्पुरिसधम्मे अविनीतो रूपं एतं मम, एसोऽहमस्मि, एसो मे अत्ता ति समनुपस्सति, वेदनं एतं मम, एसोऽहमस्मि, एसो मे अत्ता ति समनुपस्सति, संखारे एतं मम एसोऽहमस्मि एतो मे अत्ता ति समनुपस्सति. यं पिदं दिट्ठं, सुतं, मुतं, विञ्ञातं, पत्तं, परियेसितं, अनुविचरितं मनसा. तं पि एतं मम. एसोऽहमस्मि, एसो मे अत्ता ति समनुपस्सति " इत्यादिना मज्झिमनिकाय (सूत्र २२,८, पृ. ९६–९७ रा०) ग्रन्थगतपाठेन अत्रत्य–आत्मशब्दवाच्यस्य जैनपरिभाषाप्रसिद्धं द्रव्यात्मत्वम्–कषायात्मत्वादिकम्–सुप्रतीतमेव ।

तथा—

" कतमा चावुसो पठवीधातु ? पठवीधातु सिया अज्झत्तिका सिया, बाहिरा सिया × × × या चेव खो पन अज्झत्तिका पढवीधातु या च बाहिरा पठवीधातु–पठवीधातुरेव ता तं नेतं मम,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धम्मपदप्रभृतिपालिभाषानिबद्ध ग्रन्थावलोकन-मनन-चिन्तनैः पण्डितानां अवश्यमेव विश्वसनीयं भविष्यति इति ते ग्रन्थास्तैरवश्यम् अवलोकनीया इति.

यच्च तेषां प्रमाणादिव्यवस्थापनम्, तत्तु जिज्ञासुरुचिसमनुकूलतया पूर्ववदेव समन्वेतव्यम्-इति अन्यान्यदर्शनपद्धतिरिव बौद्धपद्धतिरपि अवश्यमेव तदनुसाराचारशालिनां विकासकरी-इति नाऽत्र मतद्वयमस्माकम् । तथा च समर्थितं पूज्यपादैर्हरिभद्रैरपि--

" विज्ञानमात्रमप्येवं बाह्यसंगनिवृत्तये ।
विनेयान् कांश्चिदाश्रित्य यद्वा तद्देशनार्हतः ॥ ५२ ॥
न चैतदपि न न्याय्यं यतो बुद्धो महामुनिः ।
सुवैद्यवद् विना कार्यं द्रव्यासत्यं न भाषते ॥ ५३ ॥
एवं च शून्यवादोऽपि तद्विनेयानुगुण्यतः ।
अभिप्रायत इत्युक्तो लक्ष्यते तत्त्ववेदिना " ॥ ६४ ॥

(शास्त्रवार्त्ता० स्तबक ६)

इति बौद्धगतसमन्वयः । एवमेव मुमुक्षुभिः माध्यस्थ्यमास्थाय अवगम्य चेमां हारिभद्रीं वाणीम् (सा च--

---

नेसोऽहमस्मि, न मे सो अत्ता ति. एवमेतं यथाभूतं सम्मप्पञ्ञाय दट्ठव्वं " इत्यादि-(म. सू. २८,४ पृ. १३१ रा०) मज्झिमनिकायगतपाठेन आत्मशब्दवाच्यस्य चिदात्मरूपत्वम्, शरीरभिन्नत्वं च सर्ववादिसंमतं भगवता बुद्धेनाऽपि सुस्पष्टितमेव.

तथा---

२---" अप्पमादो अमतपदं पमादो मच्चुनो पदं ।
अप्पमत्ता न मीयंति ये पमत्ता यथा मता ॥ १ ॥

(अप्पमादवग्ग)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" अन्ये व्याख्यानयन्त्येवं समभावप्रसिद्धये ।
अद्वैतदेशनाशास्त्रे निर्दिष्टा न तु तत्त्वतः") ॥ ८ ॥
(शास्त्रवा० स्त. ८)

ब्रह्ममायाप्ररूपकं वेदान्ततत्त्वम्, योगदर्शनसूचितं श्रीयोगिप्रवरपतञ्जलिमतम्, भूतवादेन च संसारासारतां समर्थयद् भगवतो बृहस्पतेः मतं च समन्वयं संगमनीयमिति ।

उपर्युक्तरीत्या षण्णामपि दर्शनानां परस्परविरुद्धत्वे समूलकाषं कषिते श्वेताम्बर-दिगम्बर-स्थानकवासिप्रभृतिसम्प्रदाय-

सब्बे तसंति दण्डस्स सब्बे भायंति मच्चुनो ।
अत्तानं उपमं कत्वा न हनेय्य न घातये ॥ १ ॥ (दण्डवग्ग)
अत्तानं चे पियं जञ्ञा रक्खेय्य नं सुरक्खितं ।
तिण्णमञ्ञतरं यामं पटिजग्गेय्य पण्डितो ॥ १ ॥
अत्तानमेव पठमं पतिरूवे निवेसये ।
अथऽञ्ञमनुसासेय्य न किलिस्सेय्य पण्डितो ॥ २ ॥
× × ×
अत्ता हि अत्तनो नाथो को हि नाथो परो सिया ? ।
अत्तना हि सुदंतेन नाथं लभाति दुल्लभं ॥ ४ ॥
अत्तना हि कतं पापं अत्तजं अत्तसंभवं ।
अभिमन्थति दुम्मेधं वजिरं वऽम्हमयं मणिं " ॥ ५ ॥
(अत्तवग्ग)

इत्यादि धम्मपदगाथागणो भगवतो बुद्धस्य आत्मवादमेव स्थापयन् निर्वाणवादिवरेण्यत्वं सूचयति-इति भगवति बुद्धे, तदुपदेशे वा अनात्मवादारोपणं यत् परैः कृतं तत् समूलमेव बौद्धशास्त्रेणैव उन्मूलितमिति दिक्.

१ जूओ नमिनाथस्वामिनुं स्तवन—"षड् दरिशण जिन अंग भणीजे" इत्यादि—(आनंदघन चोवीशी) तथा " राम कहो रहेमान कहो" ए पद—(आश्रमभजनावली).

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विरोधः कथं क्षणमपि स्थातुं शक्नुयात् । यथा भिन्नभिन्नानि शरीराणि अधिष्ठाय लोकाः लौकिकं मार्गम् अविवदमाना एव साधयन्ति, तथा आध्यात्मिकधर्मकलेवरप्रायान् एतान् संप्रदायानपि संप्राप्य विवेकिनः मध्यस्थाः, धर्मपथं च प्राप्तु-कामाः स्वविकासं साधयिष्यन्ति । अन्ये च मूढाः संप्रदाय-भूतग्रस्ताः ' न साधुना वस्त्राणि परिधेयान्येव ' ' साधुना वस्त्रसंचय एव विधातव्यः ' ' मूर्त्तिः पूजनीया एव ' ' मूर्त्तिर्न पूजनीया एव ' इत्यादिके स्वकुटुम्बक्लेशसमाने धर्मक्लेशे स्वा-त्मानं निक्षिप्य, श्रीभगवद्महावीरप्रोक्तमपि नयवादं तिरस्कृत्य किं करिष्यन्ति, क्व यास्यन्ति इति त एव जानीयुः । तथा च तान् तादृशान् प्रायो गुर्वाभासानपि वर्तमानान् धर्मगुरून् उद्दिश्य भगवान् आनन्दघनो[1]ऽपि शिक्षयति ।

" भद्दं मिच्छदंसणसमूहमइअस्स अमयसारस्स ।
जिणवयणस्स भगवओ संवेगसुहाहिगम्मस्स " ॥ ७० ॥

(भद्रं मिथ्यादर्शनसमूहमयस्य अमृतसारस्य ।
जिनवचनस्य भगवतः संवेगसुखाधिगम्यस्य ॥)

—(सम्मतितर्कप्रकरणे तृतीयकाण्डे
श्रीसिद्धसेनपादाः)

॥ इति समन्वयकाण्डः ॥

अनल्पग्रन्थसंदर्भान् समालोक्य यथामति ।
तत्त्वावताररूपोऽयं रचितस्सारसंग्रहः ॥ १ ॥

---

१ जूओ १४ मा धर्मनाथस्वामिनुं स्तवन—(आनंदघन-चोवीशी).

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वं माध्यस्थमाश्रित्य सर्वं वाच्यं विवेचितम् ।
सम्प्रदायधिया पश्चात् तत्त्वाद् रूढिर्बलीयसी ॥ २ ॥

अन्ते समन्वितं काण्डमाख्यातं तत्त्वबुद्धये ।
हारिभद्रं वचः श्रित्वा तेन स्यात् तत्त्वगो जनः ॥ ३ ॥

भूयादियं कृतिर्लघ्वी विदुषां तोषकारिणी ।
कृच्छ्रेषु जिनतन्त्रेषु मन्धधीपोषणी यतः ॥ ४ ॥

प्रमादात् स्खलनं क्वापि चापल्यं मेऽत्र चेद् यदि ।
क्षन्तुमर्हन्ति विद्वांसो मुहुरेतन्निवेदनम् ॥ ५ ॥

॥ समाप्तस्तत्त्वावतारः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only